अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिकं पत्रम्)

पंचदशवर्षे प्रथमोंऽकः

१५ जनवरी १९९३

प्रधानसम्पादकः

डा० रमाकान्त शुक्लः

एम० ए०, पीएच० डी०, साहित्याचार्यः

सांख्ययोगाचार्यः

देववाणी-परिषद्, दिल्ली

६ वाणी-विहारः, नयी दिल्ली–११००५९

अर्वाचीनसंस्कृतम् (१५/१)

परामर्शदातृ-मण्डलम्

१. आचार्य डा०रमेशचन्द्र शुक्लः
२. आचार्यश्रीश्रीनिवासरथः
३. डा०कृष्णकान्तशुक्लः
४. 'अभिराज' डा०राजेन्द्र मिश्रः
५. डा०उमाकान्तशुक्लः
६. डा० विष्णुकान्त शुक्लः

विषय-सूची

विषयः	लेखकः	पृष्ठांकः
१. सम्पादकीयम्		१
२. शुभकामना	डा०भास्कराचार्य त्रिपाठी डा०उमारमण झा डा०चन्द्रदीप शुक्लः डा० जनार्दनप्रसाद पाण्डेयः 'मणिः'	३
३. नूतने वत्सरे	आचार्य वीरेन्द्र कुमार झा	४
४. वन्दनीयास्ते	डा० रमाकान्तशुक्लः	५
५. भारतं भारतीयात्मनां भारतम	डा० वनेश्वर पाठकः	६
६. तव स्मृतिः	डा० राजेन्द्र नाणावटी	१४
७. रामनाम्नि मारणं कथं जनप्रतारणम्	श्री श्री०सुन्दरराजः	१५
८. विन्ध्याचलदण्डकम्	डा० राधावल्लभ त्रिपाठी	१७
९. भारतं रे !	डा जनार्दन प्रसाद पाण्डेय 'मणिः'	१९
१०. स्वप्नप्रबोधः (मूलकाव्यम्)	डा० कमलेशदत्त त्रिपाठी	२०
११. स्वप्नप्रबोधः (हिन्दीरूपान्तरम्)	डा० रमाकान्त शुक्लः	२१
१२. सहधर्मिता	प्रो० देवदत्त भट्टिः	२४
१३. देववाणी परिष्वद्वार्ता	रमा शुक्ला	२५
१४. संस्कृत जगद्वार्ता	आनन्दवर्धन शुक्लः	२६
१५. हे कृष्ण पाह्यामयात्	पं० टी०वि० परमेश्वर अय्यरः	३१
१६. कवि-सम्वादः	श्री बी० एस० करुणाकरः	३३
१७. राजनीतिलीला-शताधिकम् (परिशिष्टम्)	डा० दीपक घोषः	३५

सम्पादकीयम्

'अर्वाचीनसंस्कृतम्' पञ्चदशवर्षं प्रविशति ।

दिसम्बर १९९२तः इदानीं यावदपि भारतस्य नैकेषु स्थानेषु अशान्तिर्दृश्यत एव । अयोध्यायां ६ दिसम्बर १९९२ ई० तारिकायां यज्जातम् तत्र सन्ति समीक्षकाणां विप्रतिपत्तयः । केषाञ्चिन्नमतामुसारं मातृभूमेः कलंकमपसार्य कारसेवकैः स्तुत्यमाचरितम्, केषाञ्चिन्तानुसारं विवादास्पदभवनेन साकं भारतस्य प्रजातन्त्रमेव भूमिसाज्जातम्, केषाञ्चिद् दृशा इदं कृत्यं राष्ट्रद्रोहि वर्तते, केचित् पुनरत्र धर्मनिरपेक्षतां प्रति संकटं वीक्षन्ते । अस्माकं राजनेतारस्तु निर्गते सर्पे कञ्चुलं ताडयन्ति । चत्वारो राज्यसर्वकारा भग्नाः । दिल्ली-कर्णपुर-अहमदाबाद-मुम्बई-सुरत-प्रभृतिषु स्थानेषु प्रथमं साम्प्रदायिकाः कलहास्तदनु च अन्यप्रकारका उपद्रवाः विजृम्भिताः यत्र निर्दोषनृणां हत्या जाता केषाञ्चित् जिह्वा कृत्ताभूत् । कुत्रचित् निग्रहो भवति, कुत्रचित् कैश्चन निर्भयं गणतन्त्रदिवसस्य बहिष्कारः समुद्घोष्यते, कैश्चित्पुनः गृहयुद्धस्योद्घोषः क्रियते । भारतस्य राष्ट्रपतिना उच्चतमन्यायालयः किमप्यन्वेष्टुं प्रार्थितः ।

अन्यदपि यद्देशे प्रतिवेशिदेशेषु विदेशेषु च जातं भवति च—तस्य परिचयोऽस्माभिः समाचारपत्रेभ्यः समाचारमाध्यमेभ्यश्च लभ्यत एव । उपद्रविणां कृते अन्यदेशीयः शस्त्रास्त्रसंघातो देशे प्रविष्ट इत्यपि वृत्तपत्रेषु पठितम्! हन्त! देशस्य दौर्भाग्यम् ! कीदृशाः नेतारः ! कीदृशा बुद्धिजीविनः ! कीदृशी सद्भावनायात्रा ! कीदृशी च भाविनी निर्वाचने दृष्टिः ! देशस्य पुनर्नास्ति कापि चिन्ता ! अस्यामेव पृष्ठभूमावनेन जनेन **'वन्दनीयास्ते !'** इत्येतच्छीर्षकानि पद्यानि लिखितानि । अत्र 'वन्दनीया आस्ते' 'वन्दनीयाः ते' 'वन्दनीयाः ते (तव)' इति त्रिधा अर्थो भवितुं शक्नोति । सहृदयैर्यथास्थानं ज्ञेयम् । एतेषां मुक्तकानां रचना १४-१-१९९३ ई० तः पूर्वमेव जाता । केवलं चतुःपृष्ठात्मकान्येव पद्यान्यत्राङ्के प्रकाश्यन्ते, अन्यानि पुनः अप्रकाशितान्येव तिष्टन्ति । एतेषां प्रथमः पाठो मया १६-१-१९९३ ई० तारिकायाम् 'आर-६ वाणी विहार, नयी दिल्ली' इत्यत्र आयोजितायां मन्दाकिन्याः काव्यगोष्ठ्यामक्रियत । तदनु गणतन्त्रदिवसमुपलक्ष्य २०-१-१९९३ई० तारिकायां दिल्लीस्थे हिमाचल-भवने दिल्लीसंस्कृताकादम्या समायोजितेऽखिलभारतीयसंस्कृतकविसम्मेलने कानिचन पद्यानि मया पठितानि । उभयत्रापि सहृदयैरेतानि पद्यानि स्वहृदयसंवादैर्लालितानि । ते एतानि प्राप्तुं कामयन्ते स्म । तेषामनुरोधं शिरसि कृत्वास्माभिरेतान्यत्र प्रकाशितानि ।

गणतन्त्रदिवसमुपलक्ष्य आकाशवाण्या नवदिल्लीस्थे राष्ट्रीयसंग्रहालयसभागारे २३-१-१९९३ई० तारिकायां 'सर्वभाषाकविसम्मेलनम्' आयोजितम् ।

यस्य २५-१-१९९३ई० तारिकायां रात्रौ दशवादनवेलायामाकाशवाणीतः प्रसारणं जातम्। तत्र डा०कमलेशदत्तत्रिपाठिना पठिता संस्कृत कविता 'स्वप्नप्रबोधः' तस्या हिन्द्यनुवादश्चाप्यत्र प्रकाश्येते। किञ्च दिल्लीसंस्कृताकादमी-गणतन्त्र-दिवससंस्कृतकविसम्मेलने चतुर्भिः कविभिः स्वरचनासु स्रग्विणीवृत्तेन 'भारतम्' वर्णितम्। मत्कृते हर्षस्यायं विषयो यत् १९७८ तमेशवीयेऽब्दे रचयितुं प्रारब्धस्य किञ्च १९८० तमेशवीऽब्दीयेऽब्दे देववाणी - परिषदा प्रकाशितस्य 'भाति मे भारतम्' नाम्नो मम काव्यस्य चत्वारिंशत्प्राया अनुजाः सञ्जाताः। इयं च परिवारवृद्धिः विरमत्येव न। राष्ट्रपतिपुरस्कृतैरस्मन्मित्रैः डा० वनेश्वर पाठक-महाभागैः प्रणीताः **'भारतं भारतीयात्मनां भारतम्'** नाम्नी रचनात्र प्रकाश्यते। अन्येषाम् अपि कवीनां रचना यथावसरं प्रकाशयितुं यतिष्यते। अथ चास्मिन्नेव कविसम्मेलने पठिता-श्रीसुन्दरराज-श्री वी० एस० करुणाकर-डा० जनार्दनप्रसादपाण्डेय 'मणि'-पं० टी० वि० परमेश्वर अय्यर-प्रणीताः प्रत्यग्रा रचना अपि दीयन्ते। डा० राजेन्द्र नाणावटी-प्रणीता 'तव स्मृतिः' नाम्नी रचना कस्यचित् स्निग्धस्य जनस्य स्मृतिं नवीकुरुते। सरलेयं रचना मनःस्पर्शिनी वर्तते। डा० राधावल्लभत्रिपाठिप्रणीतं विन्ध्याचल-दण्डकम्' प्रकृतिप्रेम्णा पर्यावरण-विक्षोभजनितचिन्तया संवलितं कवेःकाव्य-दृष्टिञ्चोन्मीलयत् आधुनिकेषु दण्डकेषु कामपि विशिष्टां विच्छित्तिं पुष्णाति। डा० दीपकघोषस्य 'राजनीतिलीलाशताधिकं १४/१ अंके प्रकाशितमासीत्। अत्रांके तस्य परिशिष्टरूपाः श्लोका दीयन्ते। प्रो० देवदत्तभट्टिकृता 'सहधर्मिता' सौमनस्यं कामयते।

अस्माकं सकाशे डा० उमारमण झा-डा० भास्कराचार्य त्रिपाठि-डा० जनार्दनप्रसाद पाण्डेय 'मणि'-पं० चन्द्रदीप शुक्लैः शुभकामनाः सम्प्रेषिताः। एता भवद्भ्यः सर्वेभ्योऽपि समर्प्यन्ते। नववर्षं शुभं भूयात्! स्वपद्यद्वयमिदम् पुनः प्रस्तौमि—

'येषु चित्तेषु दावानलो भीषणो द्वेषभावस्य जागर्ति धूधूत्करः।
जागृयात्तेषु वासन्तिकी श्रीः शुभा नूतने वत्सरे ते भवेन्मङ्गलम्॥
तावको देश आस्तां सदा रक्षित स्तावकं विश्वमास्तां सदा रक्षितम्।
तावकी स्यात्प्रतिज्ञा सदा रक्षिता नूतने वत्सरे ते भवेन्मङ्गलम्॥

गणतन्त्रदिवसः
२६-१-१९९३
आर ६ वाणी विहारः,
नयीं दिल्ली-११००५९

(रमाकान्त शुक्लः)
प्रधानसम्पादकः

शुभकामनाः

विकिरतु सुधावर्षं वर्षं नवं तव पत्तने
प्रचुररुचिरा नक्षत्राली चकास्तु तवाजिरे
मनसि मधुरं काव्यं नव्यं तनौ नव–यौवनं
हृदयनिलये राष्ट्रप्रेमा नवस्तव जायताम्.

डा० भास्कराचार्य त्रिपाठी,
सचिवः, म०प्र०सं० अकादमी, संस्कृतिभवनम् (वाणगंगा) भोपाल-४६२००३

देशे शान्तिर्भवतु भवतां क्षेममार्गः प्रशस्तः
गेहे लक्ष्मीर्विलसतु चिरं श्रीमतां चास्तु सौख्यम् ।
देहे विद्या विमलरुचिरा ज्ञानदं वश्च कार्यम्
वर्षे नूत्ने सकलसुखदं श्रेयसे चास्तु सर्वम् ।।

डा० उमारमण झा, प्राचार्यः, गु०के०सं०वि०, पुरनाट्टुकरा-६८०५५१

कालः कल्पान्तकारो कलयति जगती जीवनस्यायुरेतद्-
वर्षं तस्यैकखण्डं भवति सुविदितं कर्मभिस्स्वेन युक्तैः ।
दुर्बुद्धेरुग्रकर्म - प्रशमनकरणो सौमनस्य प्रसारे
आतङ्कात्त्राणदाने कवचहरमिदं नूतनं वत्सरं स्यात् ।।

पं० चन्द्रदीप शुक्लः, सम्पादक : 'संस्कृतसम्मेलनम्' पटना

भूयाच्चान्द्रीह शोभा भुवि तव विमला लोकगीता च कीर्तिः
कण्ठान्माध्वीककल्पाल्लसदति भुवने 'भाति मे भारतं' स्यात्
जीव्याः सुस्पन्दमन्त्रैस्सुतमणिमहितो गेहलक्ष्मीपरीतो
द्वापंचाशत्तमेऽस्मिन् शुभजनिदिवसे शुक्ल ! वर्धापनं ते ।।

जनार्दनप्रसादपाण्डेयः 'मणिः', प्रयाग

नूतने वत्सरे

(आचार्यं वीरेन्द्र कुमार झा, श्री मोतीनाथ संस्कृत महाविद्यालयः,
रमेशनगरम्, नयी दिल्ली-110065)

नूतने वत्सरे नूतनाधायकं
यत्समायोजितं काव्यसंकीर्तनम् ।
नायकाः सन्ततं देववाण्याश्च ते
सन्तु दीर्घायुषः काम्यतेऽहर्निशम् ॥१॥

नूतने वत्सरे प्राक्तनं संस्कृतं
सत्समाराधकं सेवनीयं सदा ।
संस्कृते सर्वथा सद्गुणाः सन्ति ते
भूतले सच्छवियँहि संकल्प्यते ॥२॥

नूतने वत्सरे नूतनं चिन्तनं
चिन्तनीयं मुदा भारतीयैः जनैः ।
भारतं येन संवर्धमानं सखे
तत्सदा नान्यथा कीर्तनीयं सखे ॥३॥

भारते प्राणिमात्रं कुटुम्बं निजं
भारतं स्यात्सदा शान्तिसंस्थापकम् ।
भारती यच्छविर्भूतले भासतां
नूतने वत्सरे काम्यतेऽहर्निशम् ॥४॥

भारतं ह्यस्त्वखण्डं ह्यभिन्नं सदा
भारते भारती भात्वये भारताः ।
सेव्यमेतद्धि राष्ट्रं स्वदानैर्मुदा
नूतने वत्सरे प्रार्थ्यतेऽहर्निशम् ॥५॥

(१६-१-१९९३ई० तारिकायां नवदिल्ल्यां वाणीविहारे समायोजितायां
'मन्दाकिनी'-काव्यगोष्ठ्यां पाठाय प्रणीता रचना)

वन्दनीयास्ते !

(डा०रमाकान्त शुक्लः आर-6, वाणी विहारः, नयी दिल्ली-110059)

इय स्वर्गाधिका मे मातृभूमिर्वन्दनीयास्ते ।
परं यास्या दशाद्यत्वे, कथय किं वन्दनीयास्ते ?

चतुर्दिक् दृश्यते यासौ प्रगतिरभिनन्दनीयास्ते ।
चतुर्दिक् दुःस्थितिर्यालोक्यते, किं वन्दनीयास्ते ?

जना ये भारतं पुष्णन्ति, नित्यं वन्दनीयास्ते ।
अथो तत्पांसुलं कुर्वन्ति ये, किं वन्दनीयास्ते ?

जना एकत्वसूत्रे यैर्निबद्धा वन्दनीयास्ते ।
जनान् ये योधयन्ति प्रत्यहं किं वन्दनीयास्ते !

अभिघ्नन्तो रिपून् युद्धे चलन्तो वीरगत्याग्रे ।
दिवं ये देशरक्षार्थं प्रयाता वन्दनीयास्ते !

न ये देशस्य किन्तु स्वीयवंशस्यैव दारिद्र्यम् ।
अपाकर्तुं यतन्ते नेतृवर्या वन्दनीयास्ते !

अतस्मिंस्तस्य बुद्धिं ये दधाना वन्दनीयास्ते ।
पुनर्यें तत्र तद्बुद्धिं दधति, नो वन्दनीयास्ते ?

नहि प्रत्यक्षमनुमानं न शाब्दं नेषदुपमानम् ।
प्रमाणं मन्यते या सा मतिः किं वन्दनीयास्ते ?

चिरान्निटिले यदासीत् स्थापितं केनापि साहंकृति ।
कलंकं मार्जितं तद्यैर्न केषां वन्दनीयास्ते !

करामलकं न पश्यन्ती खपुष्पं चैव पश्यन्ती ।
असौ लोकोत्तरा दृष्टिः सखे ! ते वन्दनीयास्ते ?

पुरा दुर्भावनादीप्तिस्ततः सद्भावनायात्रा !
इयं नीतिर्मता येषां जना नो वन्दनीयास्ते !

प्रजासु प्रत्यहं कलहं विवर्धयसे स्वपोषार्थम् !
इयं वृत्तिः सखे नेतस्त्वदीया वन्दनीयास्ते !

अहिंसाचत्वरे हिंसा, सहिष्णुत्वाजिरे द्वेषः ।
क्वचिद् गृहयुद्धघोषः, किं दशेयं वन्दनीयास्ते ?

अहो राष्ट्रध्वजं गणतन्त्रदिवसं ये बहिष्कुर्युः ।
किमेते भारतीयाः ? भारतीयैर्वन्दनीयास्ते ?

प्रियं सत्यं हितं सारं वचो या वक्ति सा वाणी ।
न ते वन्द्या, परं विपरीतवक्त्री वन्दनीयास्ते ?

यमेवारुह्य यात्रां कुर्वते पारं प्रयातुं तम् ।
प्लवं विच्छेत्तुकामा बालिशा ये, वन्दनीयास्ते ?

चतुर्दिक् दन्दशूका निर्भयाः फूत्कुर्वते लोके ।
गरुत्मन् ! मौनवृत्तिस्ते किमेषा वन्दनीयास्ते ?

परीते वह्निना देशे ज्वलति धूधूधधग्धगिति ।
असौ तूष्णीकता ते किं मनागपि वन्दनीयास्ते ?

न जाने केन सन्दीप्तात्र हिंसा ताण्डवं कुरुते ।
करे धृत्वा करं ये संस्थिताः, किं वन्दनीयास्ते ?

इयं हिंसासुरी व्याप्नोति हा ! देशं समस्तं मे ।
इयं दैनन्दिनी शोच्या स्थिति किं वन्दनीयास्ते ?

उपद्रविणां कृते शस्त्रास्त्रसंघातोऽन्यदेशीयः ।
कथं देशे प्रविष्टः ? किं सुरक्षा वन्दनीयास्ते ?

उपद्रविभिः कृता निर्दोषनृणां जीवतां दाहाः ।
इमे रुधिरप्रवाहा किं प्रशासक ! वन्दनीयास्ते ?

रमन्ते सांख्यपुरुषाभा जनाः स्वासन्दिकायां ये ।
अकर्तारश्च पश्यन्तोऽखिलं, नो वन्दनीयास्ते !

जनं विनिपात्य दुर्घोरेऽसुरक्षावह्निकुण्डे ये ।
सुरक्षामण्डले गुप्ता रमन्ते, वन्दनीयास्ते ?

क्वचिद्यो धर्मनिरपेक्षाः क्वचिद्धर्मस्य वक्तारः ।
क्वचिद्धर्मावतारा नायका नो वन्दनीयास्ते ?

'कथं निर्वाचने भाविन्यहं विजयी भवामी'ति ।
इदं येषां परं लक्ष्यं, न केषां वन्दनीयास्ते !
पदं मद्यं धनं मानं यशो लब्धुं मृषा ब्रुवते ।
वराका 'बुद्धिजीवी'संज्ञका ये, वन्दनीयास्ते !
तिलं ताडं, समुद्रं गोष्पदं, मेरुं कणं कर्तुम् ।
समर्था आसते ते सूचनादाः, वन्दनीयास्ते !
अहिंसा सत्यमुपकारः श्रमः प्रेमा मतो धर्मः ।
अतो ये सन्ति निरपेक्षा इदानीं वन्दनीयास्ते !
यया नीत्या समे सद्भावसूत्रे गुंफिता न स्युः ।
असौ नीतिः किमस्माकं समेषां वन्दनीयास्ते ?
नरे शठतां दधाना सत्कृतिं दूरे प्रकुर्वाणा ।
इयं या राजनीतिर्दूरतो मे वन्दनीयास्ते !
इमे प्राक्पाद्योः पतितास्तदनु ये पृष्ठमांसादाः ।
खला मशका इवासृक्चूषका नो वन्दनीयास्ते !
यदीच्छसि भद्र ! भद्रं दुर्जनान् वन्दस्व नित्यं त्वम् ।
अरे ! ये सज्जनास्ते सज्जनाः, किं वन्दनीयास्ते !
प्रजाशिक्षासुरक्षाभरणरूपं स्वीयकर्तव्यम् ।
न पालयितुं समर्थाः शासकाः किं वन्दनीयास्ते ?
क्वचिद्वित्तीयघोटालाः, क्वचित्क्रयविक्रयोत्कोचाः ।
क्वचिच्चान्ये ह्यवाच्या येऽप्युदन्ता वन्दनीयास्ते !
कदाचित्खाडकूचर्चा कदाचिज्जंगजूचर्चा ।
इयं या दुर्दशालोक्या किमेषा वन्दनीयास्ते ?
न यद्दातुं समर्थस्तत्कृते कुरुषे प्रतिज्ञां त्वम् !
अपूर्या किं प्रतिज्ञा तावकीना वन्दनीयास्ते ?
अहो पूजास्थलं निर्मासि, पूजां नैव कुरुषे त्वम् !
कथय भक्तप्रवर ! ते भक्तिरेषा वन्दनीयास्ते ?
ययोद्गिरतो विषं स्वस्मिन्निमान् कुम्भीनसान् सहसे !
अये चन्दनतरो ! सैषा धृतिस्ते वन्दनीयास्ते ।

अये पञ्चानन ! त्वां कुक्कुरोऽयं प्रत्यहं निन्दति ।
सहानेन त्वदीया मित्रता किं वन्दनीयास्ते ?
कवेर्व्याजोक्तिरन्योक्तिः स्वभावोक्तिश्च वक्रोक्तिः ।
अनुक्त्वा किञ्चिदपि सर्वं भणन्ती वन्दनीयास्ते ॥
जना देशस्य रक्षार्थं तथा विश्वस्य कुशलार्थम् ।
यतन्ते ये न निजकृत्यैः, कथय किं वन्दनीयास्ते ?
नरा नार्योऽबलाः सबलाः कनिष्ठा मध्यमा ज्येष्ठाः ।
स्वदेशं ये न वन्दन्ते मताः किं वन्दनीयास्ते ?
स्वदेशं निन्दयन्तो विश्वबन्धुत्वस्य वक्तारः ।
फलं कांक्षन्ति ये मूलं विना, नो वन्दनीयास्ते !
यजन्ते ये विधानोक्तैः स्वकर्मभिरात्मजन्मभुवम् ।
नराः कुत्रापि निवसन्तो , न केषां वन्दनीयास्ते ?
बुधा वीराः कृषाणाः कार्मिका उद्योगिनः कवयः ।
कलाकाराः स्वदेशोन्नायका ये वन्दनीयास्ते ॥
निबद्धास्ताडिता निहता तथा विकलाङ्गतां याताः ।
जना ये देशरक्षार्थं, न केषां वन्दनीयास्ते ?
जना ये मातृभूमेर्वन्दनार्थं वन्दिनो जाताः ।
स्मितास्याः कालपाशं ये चुचुम्बुर्वन्दनीयास्ते !
अये मे मातृभूमे ! ते महिम्नो रक्षणार्थं ये ।
बलिं चक्रुः स्व सर्वस्वं, न केषां वन्दनीयास्ते ?
जननि ! ये त्वां नराः क्षतविक्षतां कर्तुं समीहन्ते ।
कृतघ्नाः कस्य वा पापीयसो वद वन्दनीयास्ते ?
अयं स्वातन्त्र्यसहकारः सदा सफलः समृद्धः स्यात् !
स्वरक्तैः सेचितोऽयं यैर्न केषां वन्दनीयास्ते ?
रमाकान्त ! व्यर्थां देशस्य विश्वस्याथ निजकृत्यैः ।
जना ये वर्धयन्ति प्रत्यहं किं वन्दनीयास्ते ?
न शब्दो नैव चार्थो न ध्वनिर्नैवास्त्वलंकारः ।
तथापीयं कवे ! कविता त्वदीया वन्दनीयास्ते !

(रचनापूर्तितिथिः १४.१.१९९३ ई०)

१९९३ वर्षीये गणतन्त्रदिवसावसरे प्रस्तुतीकृतं काव्यम्

भारतं भारतीयात्मनां भारतम्

[राष्ट्रपतिसम्मानितः डा० आचार्य वनेश्वरपाठकः, एम०ए०, डी० लिट्०, संस्कृतसदनम्, दुर्गा रोड, पहाड़ी साइड, राँची (बिहारः)]

(१)

नैव ते भारतं नैव मे भारतम्, भारतं भारतीयात्मनां भारतम् ॥
भारतं वैदिकी राष्ट्रिया कल्पना
वैदिकेष्वार्षवाक्येषु या संस्थिता,
राष्ट्रशक्तिर्यया भारतीया दृढा,
सांस्कृतिक्येकता यत्र भावात्मिकी,
धर्मशास्त्रैः पुराणैश्च मर्यादितम्,
भारतं भारतीयात्मनां भारतम् ॥
नैव ते भारतं·····

(२)

भारतं यद्धि वाल्मीकिना कल्पितम्,
वर्णितं व्यासदेवेन यद् भारतम्,
यच्च कौटिल्यनीत्याऽर्जितं भारतम्,
कालिदासादिभिर्भूरिशः शंसितम्,
गान्धिजीवेन सङ्कल्पितं भारतम्,
भारतं भारतीयात्मनां भारतम् ॥
नैव ते भारतं·····

(३)

यस्य गायन्ति देवा यशो निर्मलम्,
यक्ष-गन्धर्व-नागास्तथा किन्नराः,
यस्य सम्बन्धमाप्तुं सदैवोत्सुकाः,
भोगभूमौ स्थिता दिव्यलोकेऽपि ते,
सर्वलोकादृतं कर्मभूर्भारतम्,
भारतं भारतीयात्मनां भारतम् ॥
नैव ते भारतं·····

(४)

यत्र सीताऽग्निपूताऽपि निर्वास्यते,
द्रौपदी यत्र दुःशासनैः पीड्यते,
दृष्टिहीनैर्जनैर्यद्धि राष्ट्रं धृतम्,
हिंसया, कूटनीत्या च भीत्यादितम्,
तन्न हि स्वार्थसन्दूषितं भारतम्,
भारतं भारतीयात्मनां भारतम् ॥
नैव ते भारतं·····

(५)

यत्र जात्यादिभिः पूज्यते मानवः,
नो गुणस्यादरो नैव शक्त्यादरः,
यत्र रीतिर्न नीतिर्न भीतिः स्थिता,
नो गुरुग्रन्थ - गीता - कुरानादरः,
सद्व्यवस्थाविहीनं नही भारतम्,
भारतं भारतीयात्मनां भारतम् ॥
नैव ते भारतं·····

(६)

आर्थिकी सुव्यवस्था न संरक्षिता,
रक्षिता यत्र जात्यादिभेदस्थितिः,
यत्र चौर्यक्रियायां प्रवृत्तो जनः,
यत्र लुण्ठापहारो नवीनोद्यमः,
तन्न दुर्भावनाभावितं भारतम्,
भारतं भारतीयात्मनां भारतम् ॥
नैव ते भारतं·····

(७)

यत्र वर्णाश्रमेषु (?) गुणैः कर्मभिः
संविभक्ताः समे भारतीया जनाः,
किन्तु सर्वे स्वधर्मे प्रवृत्ताः सदा,
देशसेवाव्रतं पालयन्तो मुदा,
सर्वकर्मादृतं सर्वधर्मादृतम्,
भारतं भारतीयात्मनां भारतम् ॥
नैव ते भारतं·····

(८)

यत्र सत्यं च धर्मं परेषां हितम्,
आश्रयं प्रार्थयन्तं च कश्चिज्जनम्,
नैव लोभेन कष्टेन केनापि वा,
त्यक्तुमिच्छन्ति कष्टं सहन्ते समे,
स्वाभिमानप्रियं सर्वदैवोन्नतम्,
भारतं भारतीयात्मनां भारतम् ॥
नैव ते भारतं·····

(९)

वैदिकानामृषीणामियं कल्पना
यत्र सर्वं हि विश्वं कुटुम्बायितम्,
यत्र मित्रस्य दृष्ट्या जनो दृश्यते,
यत्र सर्वे सहैवासते सम्मुदा,
एवमौदार्यनीत्या स्थितं भारतम्,
भारतं भारतीयात्मनां भारतम् ॥
नैव ते भारतं·····

(१०)

अत्र सर्वो जनः स्यात् सुखी सर्वथा,
स्वस्थतामेत्य सर्वोऽत्र सम्मोदताम्,
नैव दुःखी भवेत् कश्चिदत्र स्थितः,
प्राप्य कामान् हि सर्वः सदा नन्दतु,
विश्वकल्याणकामे रतं भारतम्,
भारतं भारतीयात्मनां भारतम् ॥
नैव ते भारतं·····

(११)

शान्तिसञ्चारकं शीलसम्वर्द्धकम्,
संस्कृतेः सभ्यतायाश्च विस्तारकम्,
'भारते यद्धि तच्छेषलोके स्थितम्
यन्न ही भारते तत्तु कुत्रापि न',
लोकविस्मापकैर्गौरवैरन्वितम्,
भारतं भारतीयात्मनां भारतम् ॥
नैव ते भारतं·····

(१२)

सागरैः पर्वतैः काननैः सिन्धुभिः
प्राकृतैः सौष्ठवैः सम्भृतं सर्वतः,
ज्ञानगङ्गाम्बुभिर्भूतलं पावयत्-
सर्वविद्याविदैः पण्डितैर्मण्डितम्,
शीलशौर्यादिभिः सद्गुणैर्भूषितम्,
भारतं भारतीयात्मनां भारतम् ॥
नैव ते भारतं.....

(१३)

यस्य कन्याकुमारी सदा रक्षिका,
देवतात्मा हिमादिश्च संरक्षकः,
यस्य पूर्वापरौ सागरौ रक्षकौ,
रक्षणे कोटि-कोट्यो युवानः स्थिताः,
सर्वतो रक्षितं सर्वशक्त्या युतम्,
भारतं भारतीयात्मनां भारतम् ॥
नैव ते भारतं.....

(१४)

यत्र प्राणव्ययेनापि संरक्षणे
मातृभूमेर्न भीतिं भजन्ते जनाः,
क्रूरदृष्टिं परेषां सहन्ते न हि,
नो परस्वापहारे च लिप्साकुलाः,
तन्न कार्पण्यदोषादिभिर्गर्हितम्,
भारतं भारतीयात्मनां भारतम् ॥
नैव ते भारतं.....

(१५)

राष्ट्रधर्मो महान् राष्ट्र्या एकता,
सम्प्रदायो महान् भारतीयात्मता,
जातिरेका हि नो भारतीया मही,
राष्ट्र्यत्वं समेषामिदं भारतम्,
कर्मभूः, धर्मभूः, सर्वभूर्भारतम्,
भारतं भारतीयात्मनां भारतम् ॥
नैव ते भारतं.....

(१६)

एकता अस्मदीया जगद्विश्रुता,
सङ्कटापत्तिकाले वयं संहताः,
बाह्यमाभ्यन्तरं चाखिलं सङ्कटम्,
स्वात्मशक्त्या निराकुर्महे तद्वयम्
सत्यसङ्कल्पशक्त्या दृढं भारतम्,
भारतं भारतीयात्मनां भारतम् ॥
नैव ते भारतं·····

(१७)

शक्तिरेषा हि राष्ट्रस्य भित्तिर्दृढा,
यां समाश्रित्य राष्ट्रं हि नः सुस्थिरम्,
स्थैर्यमस्माकमालोक्य विद्वेषिणः,
उग्रतातङ्कविस्तारकार्ये रताः,
दुष्प्रवृत्तिर्न तेषां ग्रसेद् भारतम्,
भारतं भारतीयात्मनां भारतम् ॥
नैव ते भारतं·····

(१८)

हिन्दु-खृस्तान-सिक्खास्तथा मुस्लिमाः
यत्र कुत्रापि देशे वसामो वयम्,
सत्सु भेदेष्वनेकेषु एके वयम्,
भावना भारतीया समेषु स्थिता,
भारतीया वयं नो गृहं भारतम्,
भारतं भारतीयात्मनां भारतम् ॥
नैव ते भारतं·····

(१९)

नैव प्राच्या वयं नो प्रतीच्या वयम्,
नैव दक्षिणात्या वयं नो उदीच्या वयम्,
सम्प्रदायेषु वादेषु भिन्नेष्वपि,
नैव भिन्ना वयं नैव खिन्ना वयम्,
नीडमेकं समेषामिदं भारतम्,
भारतं भारतीयात्मनां भारतम् ॥
नैव ते भारतं·····

(२०)

मन्दिरं भारतं मस्जिदं भारतम्,
भारतं वै गुरुद्वार-गिर्जागृहम्,
देशभक्त्या च शक्त्या नवं निर्मितम्,
भारतं नः समेषां हि पूजागृहम्,
पूज्यमेतद् गृहं रक्ष्यतां भारतम्,
भारतं भारतीयात्मनां भारतम् ॥
नैव ते भारतं——···

तव स्मृतिः

(डा० राजेन्द्र नाणावटी, बी-१०३, राजलक्ष्मी सोसाइटी,
ओल्ड पडरा रोड, बडोदरा-३९००१५)

सुघट्टिता निशीथिनी सुघट्टा तव स्मृतिः ।
स्पृशति समीरलहरीव तव स्मृतिः ।
प्रकाश्य विलीना खद्योतिनी तव स्मृतिः ।
विद्युदिव चमत्कारयन्ती तव स्मृतिः ।
मेघान्निर्झरन्तो जलकणाः तव स्मृतिः ।
प्रावृण्नभोमेघसमा सरन्ती तव स्मृतिः ।
दूरादपि पर्वतस्पन्दने तव स्मृतिः ।
शिखरे ज्वलन्ती दीपशिखा तव स्मृतिः ।
चमत्कृत - पत्ररथ - गाने तव स्मृतिः ।
रजनीगन्धाया मन्दताने तव स्मृतिः ।
पर्णमर्मरे पुनर्वलिता तव स्मृतिः ।
स्पृशसि प्रत्यङ्गं पुनः पुनः तव स्मृतिः ।
अणावणौ पृथिव्या भ्रमन्ती तव स्मृतिः ।
मनस एकान्तनिष्यन्दिनी तव स्मृतिः ।
सुघट्टो निशीथो यथा सुघट्टा तव स्मृतिः ॥

।। रामनाम्नि मारणं कथं जनप्रतारणम् ।।

(श्री श्री० सुन्दरराजः आई०ए०एस०, उड़ीसासर्वकार-राजस्वमण्डल-सदस्यः, टाइप VII, एम०आर०4, यूनिट V भुवनेश्वरम् 751001)

रामनाम कीर्तितं सद्ध्वनि प्रवर्तितं
क्षेमधामकारणं क्षुधातृषापसारणम् ।
कल्मषव्यपोहनं कलाकृतित्वदोहनं
साधुवृन्दपारणं समाधिविघ्नवारणम् ।।
श्रोतृकर्णमण्डनं समस्तभीतिखण्डनं
मानवत्वबोधनं महापराधशोधनम् ।
क्रोधकामकर्शनं कृपाकटाक्षदर्शनं
कर्णपातितामृतं कथाऽनुदीरितानृतम् ।।
पापतापयापनं परोपकारदापनं
सन्मनुष्यलालनं सकृत्प्रपन्नपालनम् ।
मानसस्य पावनं मनोमलस्य धावनं
सुन्दरं च सूनृत शिवं तथैव संभृतम् ।।
सज्जनानुवर्तनं समस्तदुःखकर्तनं
भक्तमानसाप्लवं, भवाब्धितारणप्लवम् ।
मोक्षमार्गनायकं मुमुक्षुभावदायकं
वायुसूनवे प्रियं वदन्नृणां ददच्छ्रियम् ।।
सार्वभौमलक्षणं समस्तविश्वरक्षणं
श्रीशताविलक्षणं श्रितानुगृह्णदीक्षणम् ।
दासवर्गमोक्षणं दयामये क्षणोक्षणं
राक्षसप्रभक्षणम् रणेऽपि धर्मशिक्षणम् ।।
धर्मरूपविग्रहं धरासुतापरिग्रहं
सूनृते धुरन्धरं सुजातकम्बुकन्धरम् ।
तातवाक्यपालनं तरंगमालिलालनं
शस्त्रभृत्सु निस्समं समेषु सर्वदा समम् ।।

सूर्यवंशभूषणं सुहृन्मनःप्रतोषणं
भ्रातृसौख्यतत्परं भयापनोदकृत्परम् ।
ताटकानिषूदनं तपोधनप्रमोदनं
सेतुबन्धकारकं सुरारिवृन्दमारकम् ॥
कोविदत्वदायकं कृतान्तकारिसायकं
कोणपप्रमापणं कृपैकपण्यमापणम् ।
कोमलत्वभाजनं कृतार्थयत्सभाजनं
कोसलप्रशासनं करोज्ज्वलच्छरासनम् ॥
रामनाम तज्जनः कथं पथश्च्युतः पुनः
अध्ययोध्यमुच्चरन् अवद्यकृत्यमाचरत् ।
रामनाम्नि मारणं कथं जनप्रतारणं
क्षेमधाम्नि कामदे क्षमायुजां क्षमायुजाम् ॥
दुष्टमानसैरपि स्मृतो हरिर्हरत्यघं
स्पर्शिनो यदृच्छया यथाऽग्निरित्युदीरितम् ।
सत्पथप्रदर्शनं ततस्स राम एव नः
नामकीर्तनेन सन् स्मृतस्स्वयं विधास्यति ॥
दुष्कृतामसुन्दरं विलोक्य कर्म सुन्दर-
राज एष भारते स तत्सुखाय तत्परः ।
काव्यमाध्यमेन सेव्य ईश्वरे स्वयं कविः
प्रार्थनामिमां करोति संनतः कृताञ्जलिः ॥
अनयं सुन्दरराजः तनयैस्ते कृतं क्षमस्व तावदिति ।
विनयेनाभ्यर्थयते प्रणयिनि नित्यं जगन्नाथे ॥

विन्ध्याचलदण्डकम्

[डा० राधावल्लभः त्रिपाठी, संस्कृत-विभागाचार्याध्यक्षः, डा० हरिसिंह गौर वि० वि०, सागरः (म० प्र०)]

समदशकुनिरावगुञ्जद्गुहो दृश्यतेऽयं स विन्ध्याचलो बर्हिण-स्तीव्रया केकयाऽऽकारितः—स्याद् गुहोऽसौ यथा तित्तिरैरातुरैरित्व-रैर्वा वकैः खञ्जनैर्मञ्जुलैः काष्ठविस्फोटकैस्तैः कपोतैः शुकैः काक-पुंस्कोकिलैः टिट्टिभैः किं नवां मार्जनां सारयत्याततां तन्तुवाद्यान्वितां तां घनैर्दत्ततालं समायोजिताम् ।

उषसि कुतकुतं करोतीव पादेषु वा मेखलास्वस्य रिङ्गन्नसौ बालसूर्यः प्रभापुञ्जमाञ्जिष्ठरक्ताञ्चितै कोमलैः स्वैः करैस्तेन निद्रामयं सन्त्यजत्याशु विन्ध्याचलो जृम्भते तैर्दरीणां मुखैस्त्यायतेऽम्बू-कृतं चास्य वै निर्झरैः ।

यमकमुरजखड्गबन्धैर्यथा पीड्यते चित्रकाव्यैरियं संस्कृता काव्य-वाङ्माधुरी व्यञ्जना सा यथा हन्यते ते तथा जन्तवः पक्षिणः सौनिकै-र्घातकंस्तैभु शुण्डीकरैर्गृध्नुभिः क्रव्यलुब्धैर्मुहुर्हन्यमाना इमे स्वल्प-शेषा शशा मृग्यमाणा मृगा जालके वध्यमानाश्च ते तित्तिरा लावका गृह्यमाणाः शकुन्तास्तथा किंशुके किंशुके कर्कशा चात्कृतिस्तैः शुकै-स्तन्यते सा यदा हन्यते स्नेहसंवर्धनार्हा वनप्राणिनां सन्ततिर्नश्यते संसृतिर्नीयते च क्षयं प्राप्यते न्यक्कृतिं धातुरेषा कृतिः ।

क्वचिदिह खलु सान्ध्यकालेष्वयं निष्कुलायं स्थितः कौशिकः कोपितोऽसौ सुरैः स्याद् यथा कौशिको मौनमालम्ब्य घोरं तमः कृन्त-तोव स्वदृष्ट्या स्फुटां भैरवीं स्फारयत्याकुलां चीत्कृतिं तेऽपि गोमा-यवः सान्ध्यकाले निशीथेऽथवा क्वापि मायाविनश्चाशिवा स्वं शिवाभिः समं तन्वते चातितीव्रं समूहे रुतं तस्करास्तेऽथ नक्तञ्चरा कुर्वते मन्त्रणां तामूल्यां पुरातत्त्वसम्पत्तिमस्य प्रदेशस्य वा च्छद्मना विक्रयार्थं विदेशावनिं प्रापणार्थं खलाः ।

लसति शिखरिणीभिराच्छादिता सव विन्ध्याटवी मालिनी भात्यहो सा विचित्रैः सुमैः सत्फलान्याशु पथ्यानि वक्त्र नराणां नयन्ती शुभा पथ्यवक्त्रा क्वचित्, कीचकैर्मारुतापूरितैर्वंशिकां वादयद्भिस्तथा शोभते गीतिकेव क्वचिद्, भाति वैतालिकी लासिनी पङ्क्तिभिर्हंसमाला क्वचित्. प्रस्तरैस्तैः कठोरैरियं चेन्द्रवज्रेव वा क्वाप्यसौ सन्ततोतीह शार्दूलविक्रीडितं दोधकं त्रोटकं मोटकं भद्रकं धारयन्ती क्वचित्, चन्द्रलेखान्विता, पद्मिनी चापि नान्दीमुखी श्रीधरा चित्रलेखापि सा चञ्चला शालिनी शालवृक्षैस्तथा श्येनपातेन वा श्येनिका वल्लरीभिः समन्ताद् वृता क्वापि वा स्रग्विणी तैर्विचित्रच्छदैः पुष्पिताग्राऽमला मेघविस्फूर्जिता सिंहविक्रीडिता मत्तमातङ्गसञ्चारिणी भाति मत्तेभविक्रीडिता साहितीच्छन्दसां संहतिः संहिता स्याद् यथा तामिमां दुर्लभां दुर्जनैः काष्ठविक्रेतृभिर्लुप्यमानां वनालीतति विन्ध्यवन्यश्रियं भावये कामये वर्धमानां तथा सा श्रिये चामृतायास्तु मे बभ्रुवर्णा क्वचित् कृष्णवर्णा क्वचित् रक्तपीतप्रभा कुत्रचिद् भारते हृत्प्रदेशस्थिता राजते पावनी कापि विन्ध्यावनिः।

अमलधवलवारिपूरायिता मस्तके धारिताऽनेन मन्दाकिनी भाति सोष्णीषवत् सापि चर्मण्वती चर्मनद्धं करोत्यस्य देहं पुनः केन नाशंसिताः केननद्या इमा आप आराद् धृता अंसयोरस्य दूरं दुकूलायिता, मध्यवस्त्रायतेऽसा दशार्णा समं, वेत्रतुल्या तथा वेतवा राजते, नर्मदा शर्मदात्री पदं क्षालयत्यस्य विन्ध्यस्य सन्ध्याविधिं कुर्वतः प्रत्यहम् विप्रवत्।

विविधशिखरबन्धुरे दुर्गमे प्राङ्गणे दुर्गयाऽधिष्ठितं तैर्विभिन्नैः पुराणैश्च कान्तारदुर्गैर्युतं चण्डसत्त्वस्वनं चित्रविम्बैर्नितम्बैर्गुहालेख्यशिल्पान्वितं सत्कलासौष्ठवैर्मण्डितं श्यामलैः स्निग्धदूर्वाङ्कुरैर्निमलैर्निर्झरैरन्वितं कुम्भयोनिप्रतीक्षारतं नीलशैलैर्विशालैर्द्रुमैराचितं सत्फलैरानतं पुष्पशोभाङ्कितं भूमिदेव्या अधःसारितं वाऽञ्चलं सादरं नौमि विन्ध्याचलम्।

भारतं रे !!

(डा० जनार्दन प्रसाद पाण्डेय 'मणि', प्राध्यापकः, गुरुकुल महाविद्यालयः, कण्वाश्रमः कोटद्वार, गढ़वाल [उ०प्र०])

श्वसिति घनतिमिरे भारतं रे !
ज्वरति जगदजिरे भारतं रे !!

हता दुर्जनैश्शान्तिसद्भूक्तिबाला
विदीर्णाप्यहो सौख्यसौहित्यशाला
तपति कटुपिठरे भारतं रे !
श्वसिति घनतिमिरे भारतं रे !।१।।

च्युतं राष्ट्रकुण्डे विषं राजनीत्याः
क्व याताः स्वरास्ते सखे प्रीतिगीत्याः
त्रुटति गृहसमरे भारतं रे !
श्वसिति घनतिमिरे भारतं रे !।२।।

मरालास्तु निष्कासिता हन्त बन्धो
प्रविष्टा वकाः क्षीरसिन्धौ कवीन्दो
पतति कलिकुहरे भारतं रे !
श्वसिति घनतिमिरे भारतं रे !।३।।

कुतो राष्ट्रगानं कुतो राष्ट्रगीतिः
सृता सर्वतो हन्त पाखण्डनीतिः
द्रवति शठनिकरे भारतं रे !
श्वसिति घनतिमिरे भारतं रे !।४।।

स्वदेशः क्वचिद् दृश्यतां देशभक्ताः
शिवार्थं क्षणं चिन्त्यतां रे सशक्ताः
क्षयति हठजठरे भारतं रे !
श्वसिति घनतिमिरे भारतं रे !।५।।

नवदिल्ल्यां २३.१.१९९३ ई० तारिकायां राष्ट्रीयसंग्रहालय-सभागारे
आकाशवाण्या गणतंत्रदिवसमुपलक्ष्य आयोजिते सर्वभाषा-
कविसम्मेलने पठिता

संस्कृत-कविता

स्वप्नप्रबोधः

(प्रणेता : डा०कमलेशदत्त त्रिपाठी, 'आम्नायः', २०९/१, नन्दनगर
कालोनी, करौंदी, वाराणसी-२२१००५)

मुद्रितं चित्तं विधातुं ते यतन्ते, ते यतन्ताम् ।
मयाऽहल्यामनोभूमावुप्यते स्वप्नः समिद्धः ॥
निराशङ्कं सुप्यतेऽरण्ये परीते वह्निना
धग्धगिति सञ्ज्वलता विशून्ये ।
कीदृशी जडता ? विमोहः कीदृशस्ते ?
घोरकर्मा यातुधानो मन्त्रवेधं को विनिन्ये ॥

केन वेयं दर्शिता गन्धर्वनगरी
यत्र छायामूर्तिभी रुद्धा गतिर्वः ।
हन्त शप्ताः सार्थवाहाः श्रूयते किं शब्द एष
क्षीयते तामिस्रकं वा ॥

ते सुषुप्तिं कामयन्ते, कामयन्ताम् ।
अहं व्योमापूरिपटहध्वाननाविर्भावसिद्धः ॥
तपोभिर्या समारब्धा नभोगाहं,
श्रेयसे सङ्कल्पिता या दिव्ययात्रा ।
निखिललोकोच्छ्रायचक्षुष्का, समेषां
सर्वमङ्गलपूर्त्तये बद्धादरा या ॥
नव्यतीर्थारचनसुभगा लोककल्याणी मतिर्या,
या च धीर्नवमन्त्रदर्शनसम्प्रतिष्ठा ।
तं नवीनं समाश्वासं नूतने पुरुषे विधातुं
यश्च सङ्कल्पो गृहीतः कुत्र तत्सर्वं निलीनम् ॥

स्वप्नप्रबोधः

(मूल रचयिता—डा० कमलेश दत्त त्रिपाठी)
(हिन्दीकाव्यरूपान्तरकार—डा० रमाकान्त शुक्ल)

चित्त को मुद्रित बनाने के लिए यदि यत्न करते हैं, करें वे,
मैं अहल्या मनोभू में, दहक उठते स्वप्न बोता ही रहूँगा।
हाय शापित सार्थवाहो !
धग् धधग् जलते दवानल से घिरे इस शून्य में
सो रहे निःशंक ?
जड़ता ये भला कैसी तुम्हारी ?
कौन सा व्यामोह है यह ?
घोरकर्मा कौन जादूगर, कहो वह
मन्त्र से, जिसने तुम्हें कर विद्ध डाला ?
है दिखाता कौन यह गन्धर्व नगरी
रोक दी है गति तुम्हारी जहाँ छाया मूर्तियों ने
हाय शापित सार्थवाहो !
सुन रहे क्या शब्द मेरा ?
क्या अँधेरा टूटता है ?
वे तुम्हारी नींद की यदि कामना करते, करें वे
मैं गगन को पूरने वाले पटह के नाद को करता रहूँगा।
है कहाँ वह सब तिरोहित ?
जो तपस्या से जनित,
जो सर्वमंगलपूर्तिकामो,
निखिललोकोन्नतिविधात्री,
दिव्ययात्रा !
और वो मति,
लोककल्याणी—कि जो नव तीर्थ रचती
बुद्धि जो नव मन्त्रदर्शनसम्प्रतिष्ठा,
और वो संकल्प—
जो नूतन पुरुष में
नव समाश्वासन जगाने को लिया था
है कहाँ वह सब तिरोहित ?

ते रमन्ते तिरोधाने, ते रमन्ताम् ।
किन्त्वहं करवाणि किं, याचे प्रतीक्षापाशबद्धः ।।

केवलं दुःखस्वप्नजनिता दुराकाङ्क्षा,
अस्फुटालापोऽविरामं, पिशितभक्षोत्ताण्डवं च ।
आत्महन्त्री महाभीतिर्जृम्भमाणाथवा घोरा
सा बिभित्सा, या स्वदेहोत्कर्त्तने परिणति याता ।।

एकतः सा सकलवेलाभङ्गकल्पा
भोगलिप्सा जृम्भमाणा बम्भ्रमीति ।
किन्त्वपरतो दुःखसाध्या साहुतिर्या
दीयते परिरक्षणार्थं प्राणवह्नौ ।।

तत्र काम्या प्रबल-झञ्झा जयोन्मत्ता,
पूर्वजलधिं चुम्बितुं प्रसृतानुवेलम् ।
अत्र रक्ष्यास्ते प्रदीपा आनुवंश्या,
नित्यनूत्नाभिः शिखाभिर्ज्योतिषां ये समाराध्याः ।।

वरं सिद्धास्ते भवेयुर्दीपनिर्वापेऽथवा देहाभिमाने ।
अहं ज्योतिर्बीजवप्ता सन्ततं तमसो विरुद्धः ।।

रम रहे यदि वे तिरोहिति में, रमें पर क्या करूँ मैं ?
में प्रतीक्षा पाश में बँध याचना उनकी करूँगा।
आज दिखती है कहीं पर दुराकांक्षा,
मात्र जो दुःस्वप्नजनिता,
या कि अविरत फुसफुसाहट,
या पिशाची नग्न ताण्डव,
फाड़ती मुँह,
आत्महन्त्री महाभीति,
या सभी को तोड़ने की प्रबल कांक्षा—
जो कि अपनी देह को ही नोचती है।
है कहीं यदि
तोड़ती सारे किनारे
व्यावृतास्या भोगलिप्सा
तो कहीं पर दीखती
दुखसाध्य आहुति,
जो कि रक्षा के लिए
प्राणाग्नि में दी जा रही है।
काम्य हैं उस ओर
विजयोन्मत्त ऐसी प्रबल झंझा
पूर्व सागर चूमने को
जो कि तट की ओर बढ़ती
किन्तु रखवाली हमें करनी पड़ेगी दीपकों की—
जो कि पारम्परिक अपने
और जो आराध्य हैं,
नित्य नूतन शिखाओं के
ज्योतिषों की
वे भले देहाभिमानी हों, कि हों वे सिद्ध दीपों को बुझाने में,
मैं विरुद्ध तमिस्र के नित ज्योति के शुभ बीज बोता ही रहूँगा।

(आकाशवाणी दिल्ली द्वारा २३-१-१९९३ ई० को आयोजित तथा २५-१-१९९३ को रात्रि १०-०० बजे प्रसारित सर्वभाषा कविसम्मेलन में पठित कविता।)

सहधर्मिता

[प्रो० देवदत्त भट्टि: उपाचार्य:, राजकीय कालेज:, मालेरकोटला(पं०)]

धर्मोन्मादेन मत्तानां निहन्तृणां निरागसाम् ।
रामरहीमनामा स: संस्कुर्याद् बुद्धिविक्रियाम् ॥
साम्मनस्यं च भ्रातृत्वं मिथ: प्रीति: प्रवर्धताम् ।
स्यात्समाना न आकूति: समानं नश्च चिन्तनम् ॥
न नाश: कोऽपि कुत्रापि कस्यापि स्यात्कदापि वा ।
सर्वे सहास्तितामार्गे प्रचलन्तु सदा जना: ॥
स्वधर्मे वर्त्तमानाश्च परधर्मसहिष्णव: ।
अद्य भारतवर्षस्य धर्म: स्यात्सहधर्मिता ॥
योऽपि कदाचरत्तत्र नार्य्यो हिन्दुर्न चापर: ।
अनार्य एव भूयात्स: धर्मदेशप्रदाहक: ॥
हिन्दव: आर्यवंशोया परधर्मासहिष्णव: ।
न भूता न भविष्यन्तीहितास: साक्ष्यवाहक: ॥
विविधधर्मिदेशेऽस्मिन् संयताश्चेन्न दैशिका: ।
समस्तस्यैव देशस्य सर्वनाशो भवेत्तदा ॥
धर्मो विद्यते तत्रैव यत्र देशो हि जीवति ।
देशे नष्टे कुतो धर्म: स्थास्यति देशवासिन: ?
भारतीया वयं सर्वे सहाजीवाम सर्वदा ।
सर्वांश्च सह नीत्वैव चलेम पथि शङ्करे ॥
उत्पन्ने वैमनस्ये तु संवदाम मुहुर्मिथ: ।
संवादेन सदा सर्वै:, समाधानं हि लभ्यते ॥

देववाणी-परिषदः सप्तदशस्थापनादिवसे (वामतो दक्षिणम्) १. कु० ऋतु शर्मा,
२. डा० रमाकान्त शुक्लः, ३. श्रीमती शशिप्रभा गोयल,
४. डा० मण्डन मिश्रः, ५. डा० गंगाधर पण्डा च ।



८-११-१९९२ दिनांके स्वामिनारायणनगरे अ० भा० संस्कृत पत्रकारसम्मेलन-
मुद्घाटयन्तः श्रीप्रमुखस्वामिपादाः (उपरि) तैः सह संस्कृत-पत्रकाराः (नीचैः)

देववाणी-परिषद्वार्ता

१३-१२-१९९२ ई० तारिकायां 'आर ६ वाणी विहार नयी दिल्ली-११००५९' इत्यत्र देववाणी-परिषदः सप्तदशः स्थापना-दिवस-समारोहः सम्मानितोऽभूत् । समारोहस्य प्रारम्भः अभिनवशुक्लकृतया गणेशवन्दनया किञ्च कु० ऋतु-शर्मकृतया सरस्वती वन्दनया जातः । परिषन्महासचिवेन डा० रमाकान्तशुक्लेनाभ्यागतेभ्यः स्वागतं व्याहृतम् किञ्च परिषदः प्रगतिविवरणं प्रस्तुतम् । समारोहस्योद्घाटनं श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविद्यापीठस्य कुलपतिभिः डा० मण्डनमिश्रमहाभागैः आध्यक्षं च भारतसर्वकारमानवसंसाधन-विकास मन्त्रालयशिक्षाविभागे संस्कृतस्य उपपरामर्शदात्रा डा०गङ्गाधरपण्डा-महाभागेन कृतम् । अस्मिन्नवसरे 'अर्वाचीनसंस्कृतसंग्रह'स्य प्रथमः खण्डः दिल्ली-संस्कृताकादमीसचिवेन कविरत्नश्रीकृष्णसेमवालमहाभागेन, द्वितीयः खण्डः एस०सी०ई०आर०टी०-उपनिदेशिकया श्रीमत्या शशिप्रभागोयलमहाभागया, तृतीयः खण्डश्च डा०मण्डनमिश्रमहाभागेन समुन्मीलितः । डा०मिश्रेण 'अर्वाचीन-संस्कृतसाहित्यपरिचय' स्य द्वितीयः खण्डोऽपि समुन्मीलितः । इमे चत्वारोऽपि ग्रन्था डा०रमाकान्तशुक्लेन सम्पादिताः किञ्च देववाणी-परिषदा प्रकाशिताः सन्ति । डा०गंगाधरपण्डा-महाभागेन डा०रमाकान्तशुक्लप्रणीतं 'नाट्य-सप्तकम्' समुन्मीलितम् । अस्मिन्नवसरे उपस्थितेभ्यः कतिपयेभ्यः अतिथिभ्यः देववाणी-परिषत्प्रकाशिता ग्रन्था अपि समर्पिता अभूवन् ।

अस्मिन्नवसरे संस्कृतरचनानां सङ्गीत-प्रस्तुतेः कार्यक्रमोऽप्यनुष्ठीयत । डा० अविनाशशर्मणः निर्देशने कु० ऋतु शर्मा पशुपत्यष्टकम्, गंगालहरी-पद्यानि, 'जय भारतमेदिनि विश्वनुते' इत्यादि रचनानां गानमकरोत् । डा० रमाकान्तशुक्लेन जगद्धरभट्टकृता 'चतुरमुद्धरे'ति स्तुतिः किञ्च 'भाति मे भारतम्' प्रस्तुते यत्र स्थायिपदस्य सामूहिकगानं कु० ऋतु शर्मा, कु० रितु खन्ना, कु० निधि शर्मा, कु० मीनू शर्मा, श्री नीरज शर्मा, श्री अभिनव शुक्लः, श्रीमती अविनाश शर्मा, श्रीमती रवि शर्मा, श्रीमती रमा शुक्ला सौम्य-श्रीवास्तवश्चाकुर्वन् । अस्मिन्नवसरे परिषदो वीडियोफिल्मानां प्रदर्शनं, ग्रन्थ-प्रदर्शनी इत्यादयः कार्यक्रमा अपि आयोज्यन्त ।

—रमा शुक्ला

संस्कृत-जगद्वार्ता

'अखिलभारतीय-संस्कृतपत्रकारमहासंघ' नाम्नीं संस्थां पञ्जीकर्तुं तज्ज्ञापनपत्र-नियमावली-पत्राणि कार्याध्यक्षेण, महासचिवेन, कोषाध्यक्षेण च हस्ताक्षरीकृत्य १५-१०-१९९२ तारिकायां समितिपञ्जीयक-कार्यालये प्रस्तुतानि। विदितमस्तु यन्महासंघस्य स्थापना गतवर्षे जाता। महासंघस्य प्रथमं वार्षिकाधिवेशनं दिल्ल्यां १४-९-१९९२ तारिकायां जातम् यत्र वर्तमान कार्यसमितिरित्थं सर्वसम्मत्या स्वीकृता जाता—१. **अध्यक्षः** श्रीवसन्त अनन्त गाडगीलः ('शारदा'-सम्पादकः पुणे), २. **उपाध्यक्षौ** पं० चन्द्रदीप शुक्लः (संस्कृतसम्मेलन' सम्पादकः, पटना), ३. पं० वासुदेव कृष्ण चतुर्वेदः ('व्रजगन्धा' सम्पादकः, मथुरा), **कार्याध्यक्षः** ४. पं०रमाकान्त शुक्लः ('अर्वाचीनसंस्कृत'-सम्पादकः नयी दिल्ली, ५. **कोषाध्यक्षः** पं० प्रभाकर रामरत्न शास्त्री ('संस्कृतामृत'-सम्पादकः, दिल्ली), ६. **महासचिवः** डा०रामगोपाल मिश्रः ('सागरिका'-सम्पादकः. दिल्ली), ७. **संयुक्तसचिवः** पं० अशोकन् पुरनाट्टुकरः ('भारतमुद्रा'-सम्पादकः, पुरनाट्टुकरा, केरलः) ८. **संगठनमंत्री** पं० सदानन्द दीक्षितः ('लोकसुश्री'-सम्पादकः, पुरी, उड़ीसा), ९. **संयुक्तमन्त्री (जनसम्पर्कः)** पं० रामदयालु शास्त्री ('अनादिवाक्'-सम्पादकः, नयी दिल्ली) १०. **विधिसंविधानमन्त्री** पं० राज साकेती ('युगगति'-सम्पादकः, गोरखपुरम्), **कार्यसमितिसदस्याः**—११. पं० प्रकाशमित्र शास्त्री ('पारिजात'-सम्पादकः, कानपुरम्) १२. श्रीसत्यदेववर्मा ('हितसाधिका'-सम्पादकः, यमुनानगरम्, हरियाणा). १३. श्री उमाकान्त भट्टः ('रोहिणी'-सम्पादकः, मेलुकोटे, कर्णाटकः)।

२५-१-१९९३ ई० तारिकायां पञ्जीयक कार्यालयात् प्रस्तुता आपत्तीः निराकर्तुं महाचिवस्तत्कार्यालयं गतवान्। आशास्यते शीघ्रमेव संशोधितपत्रकाणि समितिपञ्जीयककार्यालये प्रस्तोष्यन्ते।

लोकभाषाप्रचारसमितेः ओडिशा राज्यशाखापक्षतो राज्यस्य विविधस्थानेषु संस्कृतसंभाषणमहोत्सवमाला १-११-१९९२ तः ३१-१२-१९९२ पर्यन्तं प्रचालिता, येन समग्रे राज्ये जीवत्संस्कृतस्य नवीनं स्फूर्तं च वातावरणं सर्जितम्। बालेश्वरमण्डलस्य दोलसाहि जनपदे १-११-१९९२ तः १०-११-१९९२ पर्यन्तं प्रथमः, मयूरभंजमण्डलस्य बारिपदानगरे १२-११-१९९२ तः २१-११-१९९२ पर्यन्तं द्वितीयः बालेश्वरमण्डलस्य जलेश्वरनगरे १४-११-९२ तः २३-११-९२ पर्यन्तं तृतीयः, बालेश्वरमण्डलस्य भोगाराईजनपदे २४-११-९२ तः ३-१२-९२ पर्यन्तं चतुर्थः, केन्दुझरमण्डलस्य टुकुणाग्रामे

६-१२-९२ तः १६-१२-९२ पर्यन्तं पञ्चमः, कटकमण्डलस्य राजनगरे च २१-१२-९२ तः ३१-१२-९२ पर्यन्तं षष्ठः संस्कृतमहोत्सवः आयोज्यन्त यत्र सहस्रशश्छात्राः, शिक्षाविदः, कार्यकर्तारः, सम्पादकाः, नागरिका विद्वांसश्च सम्मिलिता बभूवुः। लोकभाषाप्रचारसमितेः महासचिवः डा० सदानन्ददीक्षितः अन्ये च विद्वांसः प्रशिक्षणार्थिनः सम्बोधितवन्तः। अस्याः संस्कृतसम्भाषणमहोत्सवमालाया अवसरे संस्कृतनाटिकाभिनयः, संस्कृतशोभायात्रा अन्ये च सांस्कृतिकाः कार्यक्रमा अनुष्ठिता जाताः।

२७-१२-९२ई० तारिकायां ठाणे (महा०) इत्यत्र प्राच्यविद्या-अभ्यास-संस्था संवत्सर-कार्यक्रम-समापन-समारोहमायोजितवती यस्याध्यक्ष्यं देववाणी-मन्दिरसंस्थापकेन किञ्च 'गीर्वाणसुधा' संस्कृतपत्रिकाया यशस्विना सम्पादकेन श्री श्री० भि० वेलणकरमहाभागेन कृता।

केरलविश्वविद्याभ्याससचिवः ई०टी०मुहम्मद बशीर महाशयः केरलेषु विद्याभ्यासमण्डले संस्कृतस्य सर्वामपि सुरक्षां प्रत्यजानात्। सर्वकारपक्षात् संस्कृतं प्रति दुरुपदिष्टा काप्यवगणना नास्तीति स निरवोचत्।

एशियाभूखण्डस्य विपुलतमेन उत्सवेन, केरल-स्कूलयुवजनोत्सवेन समायोज्य प्रचालितस्य दशम-केरलसंस्कृतोत्सवस्य सञ्चालनाय समागतः सचिववरः भारतमुद्रासम्पादकमभिभाषमाणः न्यगादीद्यत्स सर्वकारस्याधुनातनसाम्पादिक-परिधिमनुल्लङ्घ्य संस्कृतस्य कृते यावच्छक्यं साह्यमाचरितुं सन्नद्धोऽस्तीति।

विद्या० सचिवस्य तथा च विद्या० विभागस्य उन्नताधिकारिणां सदा सान्निध्येन जनवरीमासस्य ८, ९ तारिकयोः त्रिचूरनगरे प्रवृत्तः संस्कृतोत्सवः अत्यन्तं श्रद्धेयः सञ्जातः। संस्कृतोत्सवस्य विविधस्पर्धासु विजयिभ्यः छात्रेभ्यो नूतनाः पुरस्काराश्च समुद्घुष्टाः सर्वकारेण।

केरलेषु संस्कृतमवगण्यते इतीमं परीवादं निर्मार्जयितुकाम इवादृश्यत सपरिवारः विद्यासचिवः। अतिविपुलायां मेलायां संस्कृतस्य स्वत्वं प्रौढिं च संरक्षितुं सचिवस्य दक्षिणहस्तत्वेन प्रावर्तत विद्याभ्यासनिदेशकः विजय-कुमारः, उपनिदेशकः उत्सवसञ्चालकश्च श्री पी०के० पुष्करः।

प्रो० देवदत्तभट्टि-महाभागः पञ्जाबशासनस्य 'साहित्यशिरोमणि' (९२) पुरस्कारेण सत्कृतो जातः।

नवदिल्ल्यां त्रिवेणी-समागारे 'संस्कृत-सेवक-संघ'स्य तत्त्वावधाने समायोजिते समारोहे संस्कृत-भाषायाः शिक्षणोन्नयनार्थं विशिष्टयोगदानाय

दिल्लीस्थ-वरिष्ठमाध्यमिकविद्यालयेषु वर्तमानेभ्यः सेवानिवृत्तेभ्यश्च एकादश शिक्षकेभ्यो डा० मण्डनमिश्रमहाभागेन व्यास-सम्मानः समर्पितः येषां नामानि इमानि—१. श्री गणेशशर्मा (मरणोपरान्तः), २. श्रीमती शशिप्रभा गोयलः' ३. सर्वश्री श्रीकृष्ण सेमवालः, ४. रामरत्न शास्त्री, ५. चिरंजीव शास्त्री, ६. रामदयालु शास्त्री, ७. श्रीमती उषा अग्रवालः, ८. डा० सुरेश पन्तः, ९. श्रीमती निर्मला जैनः, १०. श्रीनारायण शर्मा, ११. श्री विष्णु दत्त शास्त्री च। इति सूचयति संस्थामहामन्त्री श्री अनिलकुमारगुप्तः स्व २७-११-९२ दिनांकितविज्ञप्त्या।

नवदिल्ल्यां हिमाचलभवने, २०-१-१९९३ ई० तारिकायां 'दिल्ली संस्कृत अकादमी' गणतन्त्रदिवसमुपलक्ष्य अखिलभारतीयसंस्कृतकविसम्मेलनम् आयोजितवती यत्र सर्वश्री-श्री०सुन्दरराज-श्रीनिवासरथ-इच्छाराम द्विवेदी 'प्रणव'-जनार्दन प्रसाद पाण्डेय 'मणि'-करुणाकर-के०पी०ए० मेनन-'अभिराज' राजेन्द्र मिश्र-प्रीतिदुवे-मनोरमारंजन - शिवबालकद्विवेदी-जगदीश प्रसाद सेमवाल-कृष्णलाल-लछमनसिंह अग्रवाल-जयदेव जानी-टी० वि० परमेश्वर अय्यर-मित्रनाथ योगी-प्रकाशचन्द्र जैन-वेदकुमारी घई-वसन्त गाडगिल ओमप्रकाश ठाकुर-प्रभृतिभिः त्रिंशत्प्रायैः कविभिः स्वरचनाः पठिताः। कविसम्मेलनस्य सञ्चालनमकादमीसचिवेन 'कविरत्न' श्रीकृष्णसेमवाल महाभागेन कृतम्। सम्मेलनस्योद्घाटनं श्रीकुलानन्दभारतीयेन कृतम्, सांसदेन श्रीरामचन्द्रविकलेन कवीनामभिनन्दनं कृतम्, अध्यक्षता च डा० मण्डनमिश्रेण कृता। अस्य कविसम्लेलनस्य केचनांशा दिल्लीदूरदर्शनस्य द्वितीये चैनले २४-१-१९९३ ई० तारिकायां सायं ७-५० काले प्रसारिते 'राजधानी से' इत्येतस्मिन् कार्यक्रमे प्रदर्शिता जाताः।

'आकाशवाणी दिल्ली' गणतन्त्रदिवसमुपलक्ष्य नवदिल्ल्यां राष्ट्रीय संग्रहालय-सभागारे सर्वभाषाकविसम्मेलनमायोजितवती यत्र संस्कृतकविरूपेण डा० कमलेशदत्त त्रिपाठी तदनुवादिकविरूपेण च डा० रमाकान्तशुक्लस्तत्रोपस्थितः। अस्य कविसम्मेलनस्य प्रसारणं आकाशवाण्याः दिल्लीकेन्द्रात् २५-१-१९९३ ई० तारिकायां रात्रौ १०-०० वादनवेलायां जातम्।

गान्धीनगरे ८-११-१९९३ ई० तारिकायां ब्रह्मस्वरूपयोगिजी महाराजजन्मशताब्दिसमारोहावसरे' अखिलभारतीयपत्रकारसम्मेलनमप्यायोजितमभूत् यस्योद्घाटनं श्रीप्रमुखस्वामिपादैः दीपं प्रज्वास्य कृतम्। तैस्तत्र प्रस्तुतासु संस्कृतपत्रिकासु माल्यार्पणं कृत्वा संस्कृत-पत्रकारितां प्रति स्वादरभावो व्यक्तः। अस्मिन्नवसरे अखिलभारतीयसंस्कृतपत्रकारमहासंघस्याध्यक्षैः

'शारदा' कारैः पं० वसन्त गाडगील महाभागैः सूचितं यत्तैः शारदापत्रिकाया ३४तमवर्षे 'शारदा-वृत्तसेवा' प्रवर्त्यते। 'सी-डेक' इति संस्कृतकम्प्यूटरस्य प्रदर्शनं कृतवद्भ्यः सपरिकरेभ्यो डा० आर० रामानुजेभ्यः पत्रकार महासंघपक्षतः अभिनन्दनं व्याह्रियत। अर्वाचीनसंस्कृत'-सम्पादकेन किञ्च अ० भा० संस्कृत पत्रकारमहासंघस्य कार्याध्यक्षेण डा० रमाकान्तशुक्लेन संकृतविश्वविद्यालयेषु संस्कृतविद्यापीठेषु च संस्कृतकम्प्यूटरप्रशिक्षणस्य आवश्यकता रेखांकिता। अस्मिन्नवसरे मुख्यातिथिः श्रीजयन्तकृष्ण हरिकृष्ण दवे महाभागः आसीत्। सम्मेलने 'दूर्वा' पत्रिकायाः प्रकाशनावरोधे चिन्ता प्रकटिता जाता। अस्मिन् सम्मेलने श्री भाई शंकर पुरोहितः, श्री ई० पी० भरत पिषारटिः, श्री धुं० कवीश्वरः, श्री रामदयालुः, प्रभाकर रामरत्न शास्त्री, श्री चन्द्रगुप्त वर्णेकरः, श्री अशोकन पुरनाट्टुकरः, श्री गुलाम दस्तगीरः, अन्ये च नैके पत्रकाराः समुपातिष्ठन्। सम्मेलने संस्कृतपत्रकारिताया विविधपक्षानवलम्ब्य विचार-विमर्शो जातः।

स्वामिनमायणसम्प्रदायस्य प्रमुखस्वामिभिः उपस्थिताः पत्रकाराः उत्तरी-पार्पणेन सत्कृताः। साधुः श्रुतिप्रकाशदासमहाभागः पत्रकारसम्नेलनस्य किञ्च संकृत-सम्मेलनस्य व्यवस्थार्थं धन्यवादार्हः।

गणतन्त्रदिवसावसरे २५-१-१९९३ई०तारिकायां **'भाति मे भारतम्'** इति कार्यक्रमस्य पुनः प्रसारणं दूरदर्शनेन प्रातःकालीनप्रसारणे प्रारब्धम्। २५-१-१९९३ तारिकायामेकादशो भागः २६-१-१९९३ ई० तारिकायां त्रयोदशो भागश्च प्रसारितौ। २७-१-१९९३ ई० तारिकायां षोडशो भागः प्रसारयिष्यते। किञ्च द्वितीयचैनलेऽप्यस्य केचन भागा प्रसार्यन्ते।

'मन्दाकोनी' १६-१-१९९३ ई० तारिकायां 'आर ६ वाणी विहार नयी दिल्ली-११००५९' इत्यत्र संस्कृतकाव्यगोष्ठीमायोजितवती यस्या आध्यक्ष्यमाचार्यवेदानन्दझामहाभागैः मुख्यातिथित्वं डा० रामकरणशर्मभिः सञ्चालनं च डा० रमाकान्तशुक्लेन कृतम्। कार्यक्रमस्य प्रारम्भः अभिनव शुक्लकृतया गणेशवन्दनया जातः। तदनु डा०अविनाशशर्मणां संगीतनिर्देशने कु० ऋतु शर्ममहाभागया सरस्वती-वन्दना संस्कृतरचनानां ससङ्गीतप्रस्तुतिश्च विहिता। कु० रितु खन्ना 'भाति मे भारतम्' इत्यतः कांश्चिदंशान् प्रस्तुतवती। तदनु कविगोष्ठ्यां श्री वेदानन्द झा-डा०सुरेन्द्रनारायणत्रिपाठी-श्री ओमप्रकाशडीमरी-वीरेन्द्रकुमारझा - कविरत्नओमप्रकाशठाकुर - रमाकान्त शुक्ल-डा० रामकरणशर्ममहाभागैः स्वरचनाः पठिताः। अस्मिन्नवसरे मन्दाकिन्याः संस्थापकैः डा० रामकरणशर्मभिः डा०रमाकान्तशुक्लाय स्व

—शेषांशः ३२ पृष्ठेऽवलोक्तनीयः

श्रद्धाञ्जलयः

आचार्य गणपति शुक्लाः दिवं प्रयाताः

संस्कृत-रचनाकारा बड़वाहा-नगरवास्तव्याः आचार्यगणपतिशुक्ल-महाभागाः ७-१२-१९९२ ई० तारिकायां दिवं प्रयाताः। आचार्य शुक्लमहाभागैः बालानां कृते कथाग्रथनेन संस्कृतसाहित्यस्य श्री-वृद्धिः कृता। अर्वाचीनसंस्कृतस्य ते ग्राहका लेखकाश्चासन्। तेषां कविता नैकशोऽत्र प्रकाशिता जाताः। स्व० आचार्यशुक्लानां शोकाकुलपुत्रैः सर्वश्रीओमप्रकाश-शान्तिकुमार-योगेशकुमारशुक्लैस्तेषामौर्ध्वदेहिकक्रिया श्रौतेन विधिना सम्पादिता। १८-१२-१९९२ ई० तारिकायां 'दिगम्बर जैन धर्मशाला महावीर मार्ग, बड़वाहा' इत्यत्र 'त्रयोदशाह'-'पगड़ी'-समायोजनं जातम्।

'अर्वाचीनसंस्कृत' पक्षतः स्व० आचार्यगणपतिशुक्लेभ्यः सादरं श्रद्धाञ्जलयो निवेद्यन्ते।

पण्डितरामानन्दशर्मणां रामधामप्रयाणम्

श्रीरामकथाया अमरगायकाः 'श्रीरामधामदरबार'स्य संस्थापकाः पं०रामानन्द शर्माणः १-१-१९९३ ई० तारिकायां श्रीरामधामगामिनो जाताः। १३.१-१९९३ तारिकायां 'श्री रामदरबार, द्वारिकापुरी, मुजफ्फरनगरम्' इत्यत्र तेषां स्मृतौ श्रद्धाञ्जलिसभा आयोज्यत। स्व० श्रीरामनन्दशर्ममहाभागैः रामचरितमानसप्रभृतिग्रन्थानां गानेनसाकं संस्कृतकाव्यानामंशा अपि सस्वरं गीताः। तेभ्योऽस्माकं सादरं श्रद्धाञ्जलयः समर्प्यन्ते।

—रमाकान्तः शुक्लः
(सम्पादकः अर्वाचीनसंस्कृतम्)

हे कृष्ण पाह्यामयात्

(पं० टी०वि० परमेश्वर अय्यर: १४६६ लक्ष्मीबाई नगर,
नई दिल्ली-११००२३)

देवकीमथ च शूरजं च कृतिनौ चकार तनयो भवन्
नन्दगोपकुलगेहिनीप्रसवतल्पकं तदनु यो गतः।
सान्द्रचित्सुखसदात्मकः सदवनोन्मुखः शरणदः स मां
केशवः कपटगोपकः सदयमीक्षतां नयनरक्षकः ॥१॥

यं च तस्य खलमातुलः शकट-पूतना-प्रमुख दानवैः
हन्तुमुद्यमकृदप्यपूर्णनिज कामिनः समभवन् सदा।
यं वदन्ति पुरुषोत्तमं निगमसञ्चया गुणनिधिं स मां
केशवः कपटगोपकः सदयमीक्षतां नयनरक्षकः ॥२॥

दुर्मनःकृतिवचश्चया निधनमापिताः झटिति येन कं-
सादिकाः शतसहस्रशः समरभूतले निरवशेषतः।
सज्जनाः सुकृतभासुराः ससुखमेधिताः शुभरतिः स मां
केशवः कपटगोपकः सदयमीक्षतां नयनरक्षकः ॥३॥

यस्मै द्रुह्यति दुर्मतिः सुरिरपुर्जात्यैव वैरीभवन्
लब्धस्तोकवरावलेपकलुषो देवान्तरप्रीणनात्।
न्यूनत्वाद्वरदानकर्मणि भवेद्व्यर्थीकृतस्वश्रमः
सोऽयं भूरिकृपः सदा शरणदो नेत्रामयात् पातु माम् ॥४॥

यस्माद् धान्यधनादिकं वरगुणैर्भक्त्या च संप्रीणितात्
प्राप्नोत्येव दयानिधेः सुरवरैः सम्पूजितादादृतात्।
यस्मात् कोऽपि गुणाधिको न भवति ब्रह्माण्डभाण्डोदरे
सोऽयं भूरिकृपः सदा शरणदो नेत्रामयात् पातु माम् ॥५॥

यस्य निःश्वसितमुच्यते निगमसञ्चयो विजयसारथेः
यस्य वक्त्रगलितं हितं श्रुतिरसामृतं भुवनपावनम्।
यस्य वेणुरवमोहिता व्रजवधूगणा हृतमदाः स मां
केशवः कपटगोपकः सदयमक्षोतां नयनरक्षकः ॥६॥

यस्मिन् सान्द्रचिदात्मके क्षितिजलव्योमानि तेजोमरुद्-
युक्तान्याप्य लयं जनिं स्थितियुतां चाप्याप्नुवन्त्येव हि ।
सर्वज्ञः परिपूर्णशक्तिरमरैराराधितः सर्वदा
सोऽयं भूरिकृपः सदा शरणदो नेत्रामयात् पातु माम् ॥७॥

कृष्णो रक्षति मां चराचरगुरुः कृष्णं नमाम्यन्वहं
कृष्णेनैव नु पालितं हि भुवनं कृष्णाय को द्रुह्यति ।
कृष्णादाप्तसुखोऽहमस्तदुरितः कृष्णस्य दासोऽस्म्यहं
कृष्णे भक्तिरजस्रमस्तु मनसा हे कृष्ण ! पाह्यामयात् ॥८॥

*

संस्कृत-जगद्वार्ता

२६ पृष्ठस्य शेषांशः

रचना 'दीपिका' अप्युपायनीकृता । डा० गोविन्दचातक-ड.० सुरेन्द्रनारायण त्रिपाठिभ्यां मुख्यातिथ्यध्यक्षौ माल्यार्पणेनाभिनन्दितौ । डा०रमाशंकरश्रीवास्तवेन धन्यवादः ज्ञापितः ।

'के०के० बिड़ला फाउण्डेशन'-प्रवर्तितः 'वाचस्पतिपुरस्कारः' (१९९२) जम्मूस्थकेन्द्रीयसंस्कृतविद्यापीठप्राचार्येण डा० जगन्नाथपाठकमहाभागेन लब्धः । पुरस्कारोऽयं १९८३ ईशवीयेऽब्दे प्रयागस्थगङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठेन प्रकाशितस्य 'मृद्वीका' नामसंस्कृतकवितासंग्रहस्य रचनार्थं डा० पाठकाय प्रदीयते । इतः पूर्वं डा० पाठकः **'कापिशायनी'** रचनार्थं साहित्य-अकादमी-पुरस्कारं (१९८१) लेभे । डा० पाठकस्य नवीनतमा काव्यकृतिः **'विच्चित्ता वातायनी'** ति नाम्ना साहित्य-जगति अवतरति ।

डा० इरिनारायणदीक्षितमहाभागाय **भीष्मचरितमहाकाव्यस्य** रचनार्थं साहित्यअकादमी-पुरस्कारः (१९९२) दातुं समुद्घुष्टः । डा०दीक्षितः 'श्रीमदप्पयदीक्षितचरित'-'संस्कृत साहित्य में राष्ट्रिय भावना' 'मेनकाविश्वामित्रीय'-प्रभृतिग्रन्थकर्तृरूपेण संस्कृतसाहित्यजगति लब्धप्रतिष्ठ इति नास्त्यविदितं विदुषाम् ।

अखिल भारतीय प्राच्यविद्यासम्मेलनस्य (A.I.O.C.) षट्त्रिंशत्तममधिवेशनं 'भण्डारकर ओरियण्टल रिसर्च इन्स्टीट्यूट, पुणे' इत्यत्र २८-३०-५-१९९३ ई० तारिकासु आयोजयिष्यते । प्रतिनिधीनां पञ्जीकरणस्य अन्तिमा तिथिः १५-२-१९९३ ई० अस्ति । विस्तृतपरिचयः स्थानीयसचिवाभ्यां डा० एम० जी० धड़फले-प्रो० सरोजा भाटे-महाभागाभ्यां लब्धुं शक्यते ।

(आनन्दवर्धन शुक्लः)

।। कविसंवादः ।।

(श्री वी०एस० करुणाकरः डाइरेक्टर (मैकेनिकल), स्माल इण्डस्ट्रीज डेवलपमेण्ट आर्गेनाइज़ेशन, सप्तमतलं, निर्माणभवनम् नयी दिल्ली-११००११)

श्रीः

गणतन्त्रदिनायेति कवितापरिषत् कृता ।
तन्त्रीगणकलालापकविगो वर्धतामियम् ।।
गणतन्त्रपरे राष्ट्रे भारते महिते भुवि ।
गणभेदकथाः पश्यत् दूयते करुणाकरः ।।

घुष्टो रिपूणामपि वत्सलो यः
पत्नी यदीया करुणं हि कार्यम् ।
शुभेषु पापेष्वपि सङ्गिरन्ती
तौ दम्पती मे शरणं सदा स्ताम् ।।

"वाल्मीके ! व्यसनार्णवे स भगवान् मग्नः किमेतत् परं"
"श्रीमद्रामकथां मया विरचितां वन्ध्यां हि संपश्यतः ।
शोको बाल कथं न वा भवतु मे" "वन्ध्यां कथं सा ! मुने"
"रामेष्टा इति केचनाद्य मलिनाः कीर्तिं तदीयां प्रियाम् ।।

हृत्वा रावणतां गतास्त नितरां भूमौ सहैव स्थिते
तज्जन्मक्षितिगे सहोदरधियं हित्वाऽतिदृप्ताः कवे ।
तन्मान्यस्थलनाशकर्मणि रताः पारुष्यवाण्यां तथा
सौभ्रात्रादिगुणान् विहाय निखिलान् संबाधमाना जनान् ।।

वर्तन्ते; यदि वा स एव भवतात् भार्याहरो मे स्वयं
पौलस्त्यं त्वभयं ददामि तदिदं सत्यं त्विति श्रावितम् ।
वेलायां प्रभुणा विभीषणकृते श्रुत्वाऽपि वैरं परं
कृत्वाऽटन्ति जनेषु रामभुवने वन्ध्या कृतिः किं न मे ।।"

"पाराशर्य ! भवान् किमित्थमधुना दुःखाप्लुतो आसते"
"गान्धारीतनुसंभवेन कथितं क्षत्तुर्वचोगौरवम् ।

युद्धान्ते लिखितं मया तु जनता श्रुत्वा परं भारते
वैरं हा सहवासिषु स्फुटमियं संवर्धमाना स्थिता ॥
तस्मान्निष्फलता ममाऽपि वचसां तेनास्मि खिन्नः परं"
"एताः का भगवन्! नितान्तमलिनाः ?" "वेदस्त्रियस्ताः कवे !"
शान्तिश्शान्तिरितीव सर्वजनताशान्त्यै सदैव स्थिताः
शान्तां शान्तिमवेक्ष्य तान्तहृदयाः एतास्तथा बालक !"
सहाभिवृद्धिं न हि रोचमाना
सहैव नाशेन मुदं प्रयान्ति ।
इत्याह नेहरुः स जनास्तदेतत्
न स्मर्यते तेन किलास्मि खिन्नः ॥
उन्मत्तदृप्तवचसा जनतां प्रतार्य
श्रीभारतं, दूषयतां समेषाम् ।
एषां प्रसादो भविता यदा नौ
यत्ना भवेयुस्सफलास्तदैव" ॥
प्राचेतसो व्यास इतीर्य खिन्नौ
वेदैस्समैः भारतवृत्ततोऽद्य ।
रामश्च कृष्णश्च कृतावतारौ
ययोः कथाभिः पशुतां विहाय ।
मनुष्यता हन्त न लभ्यते हा !
तन्नाम संकीर्य कृत किमद्य ॥
गान्धी पुरा कश्चन सत्यवादी
गान्धी परा काचन माननीया ।
गान्धी परः कश्चन मारितोऽभूत
गान्धीत्रये हा ! गणतन्त्रसिद्धिः ॥
दयाकरो नाम कविस्ततोऽहं
लज्जे भृशं राष्ट्रगतिं निरीक्ष्य ।
तथाऽपि रामस्य दया विधत्तां
यथात्र भूयात् रघुनाथराज्यम् ॥

राजनीतिलीलाशताधिकम्

(परिशिष्टश्लोकाः)

डा० दीपक घोषः

२३३, शारदापल्ली, ग्रीन पार्क, कलकत्ता

दीपावलीरात्रमहोत्सवस्य महामुदः स्वादपरिग्रहाय ।
पाषण्डषण्डैस्तव मन्त्रदीक्षितैर्ध्वंसव्रतैर्हा सहसोग्रपन्थिभिः ।।

निगूढविस्फोरकवस्तुभेदं विस्फोरकोत्कीर्णमुमूर्षुनादम् ।
दिशः समन्तात् परिपूरयन्ती प्रज्वालयन्ती नरमांसपिण्डम् ।।

आरोहिगर्भाञ्जि शकटान् निशायां रहोऽन्धकारे चलतः सवेगम् ।
लौहे समुत्पाटयसे त्वमध्वनि श्यामाम्ब कोऽयं विकटो महोत्सवः ।।

समीरणोन्मुक्तविहंगकूजितच्छायाघनारण्यसुपुष्पितालकाम् ।
विमिश्रवर्णोज्ज्वलकान्तिरत्नकरत्नाकरालं कृतिसुन्दरीमिमाम् ।।

मा मा सपत्नीति सपत्नभावाद् विश्वाच्चिरं शून्यय भो वसुन्धराम् ।
अनेनसे विश्वमनोहराय मा मा क्षिप क्रूरभुजंगदंशनम् ।।

संजानतो नेतृगणस्य सर्वं चौर्याहृतैर्मादकभेषजैस्ते ।
वाणिज्यनिष्णाः क्रमवर्धमाना हृष्टाश्च पुष्टाश्च सदारपुत्रम् ।।

उच्चावचं चारुनितम्बभग्नं गायन्ति नृत्यन्ति सहस्ततालम् ।
शिवानुचारा इव ते श्मशाने शवाञ्जि शयानान् परितः प्रमत्ताः ।।

मातः श्मशानेश्वरि किं श्मशाने तवाधिकारोऽप्रतिरोध्यमार्गः ।
तथा मृतानामपि जीवितां यथा नास्ते त्वदीयात्कवलाद्विमोक्षणम् ।।

देवालयाद् देवगणान् विताड्य पीठं कृते ते रचितं मनोहरम् ।
पवित्रितं शोणितपुण्यधारया विश्राम आस्तां यदि वा श्रमस्ते ।।

भवतामभिमतम्

(२०-१-१९९३तारिकायां उडीसा-सर्वकार-राजस्वमण्डलसदस्या: श्रीमन्त: श्री०सुन्दरराज महाभागा: दिल्लीसंस्कृतअकादम्यायोजितेऽखिलभारतीयसंस्कृत सम्मेलने काव्यपाठाय समुपातिष्ठन् । २१-१-१९९३ ई० तारिकायां प्रातस्तै-र्दूरभाषे अधोदत्त: श्लोको मह्यमश्रावि किञ्च सम्मेलने पूर्वपठितानां कवितानां प्रस्तुतौ स्वाभिप्राय: प्रकटिता: । स एवात्र पत्ररूपेण प्रस्तूयते । कविबन्धवोऽत्र स्वावधानं दातुं प्रार्थ्यन्ते । —सम्पादक:)

S. SUNDARAJAN I A S

Station (शिविरम्)
ओड्र (उड़ीसा) भवनम् नव दिल्ली
दि० २१.१.१९९३

॥ श्री: ॥

मान्या: श्रीरमाकान्तशुक्लमहोदया:,

अद्य प्रात: आवां दूरवाण्यां संभाषितवन्तौ । कविसम्मेलने निमन्त्रिता: संस्कृतकवय: प्रायश: स्वीया: पुरातनीरेव कविता: पठन्ति · नूतनकविता: रचयित्वा न पठन्ति । एवं किमर्थं भवतीति न जाने । विषयवस्तुन: सीमितित्वात् अथवा नूतनकविता: पठनीया इति नियमाभावाद्वेति विमर्शनीयम् । एत-द्विषये ह्य आवां चर्चितवन्तौ च । अवश्यं अय विषादस्य विषय: । एतदधिकृत्य मया रचितं पद्यमेकमधो दीयते । अस्य "अर्वाचीनसंस्कृते" तथा अन्यसंस्कृत-पत्रिकासु च मुद्रणविषये भवन्त: प्रमाणम् ।

भुवि रसिकजनानां काममाह्लादिनीनां नवनवकवितानां कुर्वते नावतारम्
शवमिव परमन्त्रालंकृतं दर्शयन्त: शिव शिव कवयोऽमी पूर्वकाव्यं पठन्ति ।

इति भवदीय:

सुन्दरराज:

अर्वाचीनसंस्कृतम् (पंजी० सं० 34554/79)

१. प्रकाशनस्थानम् —नयी दिल्ली
२. प्रकाशनकालावधि: — त्रैमासिकम्
३. सङ्केतेन सह मुद्रकस्य, प्रकाशकस्य सम्पादकस्य च नाम नागरिकता च-डा० रमाकान्त शुक्ल:, भारतीय:, देववाणी-परिषद्, दिल्ली, ६, वाणी-विहार:, नयी दिल्ली-११००५९ ।
४. पत्राधिकारिणां नाम्ना सह सङ्केत: —देववाणी-परिषद्, दिल्ली, ६, वाणी-विहार:, नयी दिल्ली-११००५९ ।

डा० रमाकान्तशुक्ल इति नामाहं समुद्घोषयामि यदुपरिलिखितं सकलमपि विवरणं मम मतौ सत्यमस्ति । —डा० रमाकान्त शुक्ल:

२६-१-१९९३ प्रकाशक:, सम्पादक:

दिल्ली संस्कृत अकादम्या

1991-92 वर्षीया : उपलब्धय:

1. सम्मेलनानि

(क) अखिलभारतीयसंस्कृतकविसम्मेलनम् । (ख) अखिलभारतीय त्रिदिवसीयसंस्कृतपत्रकारसम्मेलनम् (ग) स्थानीयसंस्कृतकविसम्मेलनम् (घ) श्लोकसंगीतसम्मेलनम् (ङ) द्विदिवसीयवैदिकसम्मेलनम् ।

2. संगोष्ठ्य:

(क) ज्योतिषशास्त्रस्य प्रामाणिकता (ख) संस्कृतकाव्यगोष्ठी (ग) भारतीयसंदर्भे संस्काराणां महत्त्वम् (घ) संस्कृतशिक्षकसंगोष्ठी (ङ) संसाराय वैदिकायुर्वेदस्य योगदानम् (च) वेदेषु-इतिहासतत्त्वानि सन्ति न वा (छ) पण्डितराजजगन्नाथस्य साहित्ये राष्ट्रियभावना (ज) कालिदास-साहित्ये स्त्रीणां महत्त्वम् (च) वाल्मीकिरामायणे मानवीयचेतना (ञ) राष्ट्रियैकतायां भारतीयभाषाणां योगदानम्

3. परिचर्चा:

(क) धर्मस्य शाश्वतमूल्यानि राजनीतिश्च (ख) संस्कृतस्य पञ्जाबी भाषाया उपरि प्रभाव: (ग) वर्तमान - सन्दर्भे बौद्धधर्मस्य प्रासंगिकता (घ) धर्मस्य वर्तमानयाथार्थ्येन सह कथं समन्वय: स्यात् ।

4. परिसंवादा:

(क) जैनसंस्कृतवाङ्मये स्त्रीपुरुषयो: समानता

(ख) ज्योतिषविज्ञानस्याधारे सूर्यचन्द्रग्रहणविवेचनम् ।

5. सम्माना:

(क) संस्कृतसेवासम्मान: (ख) विद्यालयीयसंस्कृत-सेवासम्मान:

(ग) अकादमीसहयोगिसम्मान: ।

6. प्रतियोगिता:

(क) संस्कृतश्लोकसंगीतप्रतियोगिते [१. विद्यालयस्तरीया २. महाविद्यालयस्तरीया] (ख) श्लोकोच्चारणप्रतियोगिता [१. विद्यालयस्तरीया] (ग) संस्कृतनाट्यप्रतियोगिते [१. विद्यालयस्तरीया २. महाविद्यालयस्तरीया] (घ) संस्कृतभाषणप्रतियोगिता: [१. संस्कृत विद्यालयस्तरीया २. सामान्यविद्यालयस्तरीया ३. महाविद्यालयस्तरीया च] (ङ) नवोदितसंस्कृतकविप्रतियोगिता (च) श्लोकान्त्याक्षरीप्रतियोगिते [१. संस्कृतविद्यालयस्तरीया २. संस्कृतमहाविद्यालयस्तरीया] (छ) संस्कृतश्लोकसंगीतसन्ध्याप्रतियोगिते [१. कनिष्ठवर्गस्तरीया २. वरिष्ठवर्गस्तरीया]

7. पुरस्काराः

(क) संस्कृतशिक्षकपुरस्कारः (ख) अखिलभारतीयमौलिकसंस्कृतसाहित्य-रचनापुरस्कारः (ग) संस्कृतप्रतिभापुरस्कारः ।

8. अध्ययनाध्यापनकार्यक्रमे

(क) संस्कृताध्ययन-प्रशिक्षिणशिविरम्

(ख) संस्कृत-अध्ययनकेन्द्र-योजनाः ।

9. प्रकाशनसहयोगः

पाण्डुलिपिप्रकाशनसहयोगः ।

10. राष्ट्रस्तरीयकार्यक्रमेषु संस्कृत-अकादमी-योगदानम्

11. प्रकाशनादिः

(क) 'संस्कृतमंजरी'-प्रकाशनम् (ख) 'महाबुद्धवत्थु' महाग्रन्थस्य प्रथमद्वितीयभागयोः प्रकाशनम् (ग) अकादमीविवरणिका-प्रकाशनम् ।

12. टेलीफिल्म-योजना

13. संस्कृत स्तोत्र टेप-योजनायाम्

(क) वर्णात्मकभगवतीसुप्रभातम् (ख) हनुमत्सुप्रभातम् ।

14. समारोहाः

(क) प्रतियोगिता-पुरस्कारवितरण-समारोहः

(ख) महाबुद्धवत्थु-प्रथमभाग-लोकार्पणसमारोहः

(ग) 'भीम-शतकम्' काव्य-लोकार्पण-समारोहः

(घ) संस्कृतसाहित्यसेवासम्मानसमारोहः [१९९०-९१ वर्षीयः]

(ङ) अकादमीसहयोगेन प्रकाशितानां संस्कृतग्रन्थानां लोकार्पणसमारोहः

(च) संस्कृतमंजरी-पत्रिकालोकार्पणसमारोहः

(छ) संस्कृतदिवससमारोहः ।

15. संस्कृत-पत्र-पत्रिका-विज्ञापन-सहयोगः

अकादमीपक्षतः समायोजितानां समेषां कार्यक्रमाणां संस्कृतज्ञैः संस्कृतानुरागिभिश्च महती प्रशंसा कृता । कार्यक्रमेषु समागतः जनसम्मर्दस्तेषां समुत्साहोऽकादम्यै पाथेयरूपो विद्यते । येनाकदम्याः समे कर्मचारिणः द्विगुणेनसमुत्साहेन निष्ठया च कार्यसम्पादने प्रवृत्ताः भवन्ति । अकादम्याः विकासाय सम्वर्धनाय च अस्याः समितिरपि प्रशस्या । यस्याः मार्गदर्शनमस्मान् कृतार्थीकरोति ।

श्रीकृष्ण सेमवालः

(सचिवः)

उद्देशिका

"हम, भारत के लोग, भारत को एक संपूर्ण
प्रभुत्व-संपन्न समाजवादी पंथनिरपेक्ष लोकतंत्रात्मक
गणराज्य बनाने के लिए, तथा उसके समस्त नागरिकों को ..."

सर्व धर्म समभाव

मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम्।
मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे।
मित्रस्य चक्षुषा समीक्षामहे।।

Yajurveda .(यजु. 36-18)

सभी धर्मों के लिए समान आदर की भावना
भारतीय संस्कृति में रची-बसी है
यही भावना हमारे आध्यात्मिक चिंतन
का आधार रही है
हमारी वास्तविक शक्ति धर्मनिरपेक्षता है
और यही है हमारे संविधान की मूल भावना
आईये,धर्मनिरपेक्षता के मार्ग पर चलने
का एक बार फिर संकल्प लें

لا يؤمن احدكم حتى يحب
لأخيه ما يحب لنفسى

(Hadith.)

Treat others exactly
as you would like
to have them treat you.

(Luke 6,31)

ਦੇਹਰਾ ਮਸੀਤ ਸੋਈ, ਪੂਜਾ ਐ ਨਮਾਜ਼ ਓਹੀ,
ਮਾਨਸ ਸਭੈ, ਪੈ ਅਨੇਕ ਪੈ ਪੁਰਾਨ ਪੈ।
.....
ਅਲਹ ਅਰੂਖ ਸੋਈ, ਪੁਰਾਨ ਐ ਕੁਰਾਨ ਓਹੀ,
ਏਕ ਹੀ ਸਰੂਪ ਸਭੈ ਏਕ ਹੀ ਬਨਾਵ ਪੈ।

Guru Gobind Singh

धर्मनिरपेक्षता
हमारे गणतंत्र की शक्ति

सी.एच.सी. 92 570

स्वास्थ्य और सौंदर्य का राज़ अब छिपा नहीं है।
दुनिया की लाखों महिलायें इसे जानती हैं।



आप ही इससे वंचित क्यों रहें?

2 रुपये
प्रति पैकेट



सभी दवा-विक्रेताओं के यहाँ उपलब्ध

NH 92/239 davp

'भाति मे भारतम्'

(सार्वभौमसहृदयसभा)

देशे विदेशेषु च भारतमवलम्ब्य प्रणीतानां रचनानां पठनार्थम्, एकलगानार्थं समूहगानार्थं, नृत्ययोजनार्थं, व्याख्यार्थम्, अभिनयार्थं तथा च भारतीयताया: प्राक्तनं, नूतनं चिरन्तनं च गौरवं समुन्मीलयितुं किञ्चात्र काले काले समागतान् दोषान् दूरीकर्तुं विहितान् साहित्यिकान्, कलात्मकान् सांस्कृतिकांश्च प्रयासान् सर्वजनेभ्य: सुलभीकर्तुं भारतस्य नैकेषु विश्वविद्यालयेषु पाठ्यत्वेन निर्धारितस्य गोष्ठीषु सम्मेलनेषु च नैकश: श्रावितस्य किञ्चाकाशवाणी-दूरदर्शनत: बहुधा प्रसारितस्य **'भाति मे भारतम्'** इति काव्यस्य प्रणेतृ-गायक-निर्देष्टृणां डा० रमाकान्तशुक्लानां प्रेरणया 'भाति मे भारतम्' (BHATI ME BHARATAM) नाम सार्वभौमसहृदयसभा स्थापितास्ते। आरम्भिकचरणे देशेऽस्या: १०१ शाखा: स्थापयिष्यन्ते यत्र न्यूनतमै: एकादशसदस्यैर्भाव्यम्। स्थापितासु शाखासु 'भाति मे भारतम्' नाम पुस्तकं, वीडियो-फिल्मं, श्रव्यध्वनिपट्टिका (ऑडियो कैसेट) किञ्चान्यान्या सामग्री निष्पत्ति (लागत) मूल्येन प्रेषयिष्यन्ते। वर्षे एकवारं प्रत्येकं शाखा वार्षिकाधिवेशनं करिष्यति केन्द्रीय-कार्यालये च विवरणं प्रेषयिष्यति यत: प्रतिभागिनां कृते प्रमाणपत्राणि प्रेषयिष्यन्ते। शाखा स्थापनार्थं विस्तृतपरिचयार्थं समुत्सुका: संयोजका: स्वनामसंकेतांकितेन उत्तरपुटकेन (Reply envelope) सहितं पत्रमधस्तने संकेते प्रेषयितुं प्रार्थ्यन्ते।

किञ्च यै: रचनाकारै: भारतमवलम्ब्य कस्यामपि भाषायां रचना कृता ते स्वां रचनां मूलभाषालिप्यां देवनागरीलिप्यन्तरेण विलिख्य/मुद्रापयित्वा तस्या: संस्कृतभाषायां हिन्दीभाषायाम् आंग्लभाषायां चानुवादं विधाय/कारयित्वा तस्या: प्रयोगार्थं/ज्ञानार्थं स्वीकृतिमधोहस्ताक्षरिण: सकाशे प्रेषयितुं सादरमनुरुध्यन्ते। पुनश्चात्रावधेयं यदेतदर्थं तेभ्य: कश्चिद्धनराशिर्नैव दास्यते। एतत्तु पुन: प्रयतिष्यत एव यत्तेषां रचना अधिकाधिककण्ठेषु लब्धास्पदा भवेयु:।

अशासे विश्वबन्धुत्वसंवलिताया राष्ट्रीयचेतनाया: साक्षात्कारार्थं /भवद्भिर्योगदानं विधास्यते।

आनन्दवर्धन शुक्ल:
संयोजक:
'भाति मे भारतम्'
सार्वभौमसहृदयसभा

२६.१.१९९३ आर-६, वाणी विहार:, नयी दिल्ली-११००५९

अर्वाचीनसंस्कृतम्

(R. N. 34554/79)

अर्वाचीनसंस्कृतस्य विज्ञापनशुल्कम्

आवरणपृष्ठस्य	२०००-०० प्रतिपृष्ठम्
अन्यपृष्ठानाम्	१०००-०० प्रतिपूर्णपृष्ठम्
अर्धपृष्ठस्य	५००-००

अर्वाचीनसंस्कृतस्य ग्राहकशुल्कम्

(१९९३ तः प्रभावि)

संस्थानां कृते वार्षिकं (भारते) रु० 40.00
वार्षिकं (विदेशेषु) यू एस० डालराः 10
आजीवनं (भारते) रु० 400.00
आजीवनं (विदेशेषु) यू० एस० डालराः 100

व्यक्तीनां कृते वार्षिकं (भारते) रु० 30.00
वार्षिकं (विदेशेषु) यू० एस० डालराः 10
आजीवनं (भारते) रु० 300.00
आजीवनं (विदेशेषु) यू० एस० डालराः 100

डाकव्ययः [यदि पंजीकृत (रजिस्टर्ड) डाकद्वारा अर्वाचीन संस्कृतस्य सर्वेऽप्यङ्काः प्रेष्येरन्]
भारते : रु० 30 00
विदेशेषु : यू० एस० डालराः 10

देववाणी-परिषदः सदस्यानां सभासदां च कृते पत्रं निःशुल्कं प्रेष्यते। किन्तु पञ्जीकृतडाकद्वारा पत्रप्रेषणार्थं तैरपि डाकव्ययो देयः स्यात्। ग्राहकाः ग्राहकशुल्कं **'अर्वाचीनसंस्कृतम्'** (Arvacheenasanskritam/*Arvācīnasaṁskṛtam*) इत्यंकितेन बैंकड्राफ्टेन धनादेशेन (M. O) वा निम्नलिखिते संकेते प्रेषयितुं प्रार्थ्यन्ते।

सम्पादकः
अर्वाचीनसंस्कृतम्
देववाणी-परिषद्, दिल्ली
आर-6 वाणी-विहारः, नयी दिल्ली-110059 (भारतम्)

'देववाणी-परिषद, दिल्ली'-कृते डा रमाकान्तशुक्लेन 'देववाणी प्रिंटर्स, उत्तम नगर, नयी दिल्ली-११००५९'इति मुद्रणालये मद्रापयित्वा 'आर-६ वाणी विहारः, नयी दिल्ली-११००५९' तः प्रकाशितम्-अर्वाचीनसंस्कृतम् (१५/१)-प्रधानसम्पादकः डा० रमाकान्त शुक्लः। प्रकाशनतिथिः २६.१.१९९३।
अस्यांकस्य मूल्यम् रु० १०.०० Rs. 10.00